एकार्णवे तदा वृत्ते द्विव्ये वर्षसहस्रके।
स्रष्टुकामः प्रजा ब्रह्मा चिंतयामास दुःखितः ।२॥
तस्य चिंतयमानस्य पुत्रकामस्य वै प्रभोः।
कृष्णः समभव द्विर्णो ध्यायतः परमेष्ठिनः ॥३॥
अथापश्यन्महातेजाः प्रादुर्भूतं कुमारकम्।
कृष्णवर्णं महावीर्यं दीप्यमानं स्वतेजसा ॥४॥
कृष्णांबरधरोष्णीष कृष्णयज्ञोपवीतिनम्।
कृष्णेन मौलिना युक्तं कृष्णस्रगनुलेपनम् ॥५॥
स तं दृष्ट्वा महात्मानमघोरं घोरविक्रमम्।
ववंदे देवदेवेशमद्भुतं कृष्णपिंगलम् ॥६॥
प्राणायामपरः श्रीमान् हृदि कृत्वा महेश्वरम्।
मनसा ध्यानयुक्तेन प्रपन्नस्तुतमीश्वरम् ॥७॥

श्री सूत जी ने कहा—इसके अनन्तर स्वयम्भू के पीत वर्ण वाले कल्प के व्यतीत हो जाने पर फिर अन्य कल्प प्रवृत्त हुआ था जिसका नाम असित कल्प था ॥१॥ जिस समय दिव्य एक सहस्र वर्ष तक एक ही अर्णव हो गया था तो उस समय सृष्टि की इच्छा रखने वाले ब्रह्मा

ने अत्यन्त दु खित होकर चिन्तन किया था ।।२।। पुत्रो की कामना रख कर चिन्तन करने वाले उस प्रभु का जो कि परमेष्ठी ध्यान कर रहे थे उनका कृष्ण वर्ण हो गया था ।।३।। इसके अनन्तर महान् तेज वाले ने प्रादुर्भूत हुए एक कुमार को देखा था जिसका कृष्ण तो वर्ण था, वह महान् वीर्य वाला था और अपने परमाद्भुत तेज से दीप्यमान हो रहा था ।।४।। उस कुमार के मस्तक पर कृष्ण वर्ण का उष्णीष था, कृष्ण वर्ण का ही यज्ञोपवीत धारण किए हुए था, वह कृष्ण मौलि से युक्त था और कृष्णस्रक् तथा अनुलेपन भी उसका कृष्ण ही था ।।५।। उस महान् आत्मा वाले, अघोर, घोर विक्रम से युक्त को देखकर उसने देवदेवेश अद्भुत कृष्ण पिङ्गल को नमस्कार किया था ।।६।। प्राणायाम मे तत्पर होकर श्रीमान् ने हृदय मे महेश्वर का ध्यान किया और ध्यान से युक्त मन के द्वारा उस ईश्वर की शरण मे प्राप्त हुआ था ।।७।।

अघोरं तु ततो ब्रह्मा ब्रह्मरूपं व्यचिंतयत् ।
तथा वै ध्यायमानस्य ब्रह्मणः परमेष्ठिनः ।।८।।
प्रददौ दर्शनं देवो ह्यघोरो घोरविक्रमः ।
अथास्य पार्श्वतः कृष्णाः कृष्णस्रगनुलेपनाः ।।९।।
चत्वारस्तु महात्मानः संबभूवुः कुमारकाः ।
कृष्णाः कृष्णशिखश्चैव कृष्णास्यः कृष्णवस्त्रधृक् ।।१०।।
ततो वर्षसहस्रं तु योगतः परमेश्वरम् ।
उपासित्वा महायोगं शिष्येभ्यः प्रददुः पुनः ।।११।।
योगेन योगसंपन्नाः प्रविश्य मनसा शिवम् ।
अमलं निर्गुणं स्थानं प्रविष्टा विश्वमीश्वरम् ।।१२।।
एवमेतेन योगेन येपि चान्ये मनीषिणः ।
चिंतयंति महादेवं गंतारो रुद्रमव्ययम् ।।१३।।
ततस्तस्मिन् गते कल्पे कृष्णवर्णे भयानके ।
तुष्टाव देवदेवेशं ब्रह्मा तं ब्रह्मरूपिणम् ।।१४।।

अनुगृह्य ततस्तुष्टो ब्रह्माण मवदद्धरः।
अनेनैव तु रूपेण संहरामि न संशयः ॥१५॥

इसके अनन्तर ब्रह्मा ने अघोर ब्रह्म रूप का विशेष रूप से चिन्तन किया था और इस रीति से ध्यान करने वाले परमेष्ठी ब्रह्माजी को घोर विक्रम वाले अघोर देव ने दर्शन दिया था। इसके पश्चात् ब्रह्मा के पार्श्व से कृष्ण स्रक् और अनुलेपन वाले तथा कृष्ण वर्ण से युक्त महान् आत्मा वाले चार कुमार उत्पन्न हुए थे वे सब कृष्ण थे, कृष्ण शिखा वाले थे, कृष्ण मुख से युक्त और कृष्ण वस्त्र धारी थे ॥८॥९॥ ॥१०॥ एक सहस्र वर्ष तक वहां रह कर योग से परमेश्वर की उपासना करके फिर शिष्यों को महायोग दे दिया था ॥११॥ योग के द्वारा योग से सम्पन्न उन्होंने मन के द्वारा शिव मे प्रवेश करके अमल और निर्गुण स्थान विश्व ईश्वर में प्रविष्ट हो गये थे ॥१२॥ इस प्रकार से योग के द्वारा अन्य मनीषी लोग भी महादेव का चिन्तन करते हुए अव्यय रुद्र के निकट गमन किया करते हैं ॥१३॥ इसके अनन्तर भयानक कृष्ण वर्ण वाले कल्प के जाने पर ब्रह्मा जी ने ब्रह्मरूपी उस देवों के देवकी स्तुति की थी। इसके उपरान्त वह तुष्ट होकर अनुग्रह से युक्त हो गये और ब्रह्मा से बोले कि मैं इसी स्वरूप से सबका संहार किया करता हूं— इसमें कुछ भी संशय नहीं है ॥१४॥१५॥

ब्रह्महत्यादिकान् घोरास्तथान्यानपि पातकान्।
हीनाश्चैव महाभाग तथैव विविधान्यपि ॥१६॥
उपपातकमप्येवं तथा पापानि सुव्रत।
मानसानि सुतीक्ष्णानि वाचिकानि पितामह ॥१७॥
कायिकानि सुमिश्राणि तथा प्रासंगिकानि च।
बुद्धिपूर्वं कृतान्येव सहजागतुकानि च ॥१८॥
मातृदेहोत्थितान्येवं पितृदेहे च पातकम्।
संहरामि न संदेहः सर्वं पातकजं विभो ॥१९॥

लक्ष जप्त्वा ह्यघोरेभ्यो ब्रह्महा मुच्यते प्रभो ।
तदर्धं वाचिके वत्स तदर्धं मानसे पुनः ॥२०॥

ब्रह्म हत्या आदि महाघोर तथा अन्य महापातकों का तथा हे महाभाग ! अन्य विविध प्रकार के पापों का और हीनो का मैं संहार करता हूँ ॥१६॥ हे सुव्रत ! इसी प्रकार से उपपातकों को तथा हे पितामह ! मानस पाप और सुतीक्ष्ण शारीरिक पापवाचिक पाप, सुमिश्र, प्रासङ्गिक पाप, बुद्धि पूर्वक किये हुए एवं सहज और आगन्तुक पापों को संहृत कर देता हूँ ॥१७॥१८॥ काल के देह में उत्थित पाप तथा पितृदेह मे होने वाले पाप का भी मैं संहार कर डालता हूं—इसमें सन्देह नहीं है । हे विभो ! समस्त पातकों से उत्पन्न होने वाले दोष को एक लक्ष जाप करके अघोरों से ब्रह्महा भी मुक्त हो जाता है । हे वत्स ! उससे आधा जप करके वाचिक पाप से और उसका आधा भी जप करके मानस पाप से छुटकारा पा जाया करता है ॥१९॥२०॥

ईशानोद्भव और पञ्च ब्रह्मात्मक स्तोत्र

अथान्यो ब्रह्मण. कल्पो वर्तते मुनिपुंगवा ।
विश्वरूप इति ख्यातो नामतः परमाद्भुतः ॥१॥
विनिवृत्ते तु संहारे पुन. सृष्टे चराचरे ।
ब्रह्मणः पुत्रकामस्य ध्यायत. परमेष्ठिनः ॥२॥
प्रादुर्भूता महानादा विश्वरूपा सरस्वती ।
विश्वमाल्याम्बरधरा विश्वयज्ञोपवीतिनी ॥३॥
विश्वोष्णीषा विश्वगंधा विश्वमाता महोष्ठिका ।
तथाविधं स भगवानीशानं परमेश्वरम् ॥४॥

शुद्धस्फ टिकसंकाशं सर्वाभरणभूषितम् ।
अथ तं मनसा ध्यात्वा युक्तात्मा वै पितामहः ॥५॥
ववंदे देवमीशानं सर्वेश सर्वगं प्रभुम् ।
ओमीशान नमस्तेऽस्तु महादेव नमोस्तु ते ॥६॥
नमोस्तु सर्वविद्यानामीशान परमेश्वर ।
नमोस्तु सर्वभूतानामीशान वृषवा हन ॥७॥
ब्रह्मणोधिपते तुभ्यं ब्रह्मणे ब्रह्मरूपिणे ।
नमो ब्रह्माधिपतये शिव मेऽस्तु सदाशिव ॥८॥
ओंकारमूर्ते देवेश सद्योजात नमोनमः ।
प्रपद्ये त्वा प्रपन्नोऽस्मि सद्योजाताय वै नमः ॥९॥

अब ईशवोद्भव पञ्च ब्रह्मात्मक स्तोत्र का वर्णन किया जाता है। सूत जी ने कहा—हे मुनि पुङ्गवो ! इसके अनन्तर अन्य ब्रह्मा का कल्प होता है। इसका विश्वरूप नाम प्रख्यात है और यह परम अद्भुत कल्प है ॥१॥ सृष्ट चराचर के संहार के विनिवृत्त हो जाने पर पुत्रों की कामना रखने वाले परमेष्ठी ब्रह्मा ध्यान कर रहे थे ॥२॥ उस समय महान् नाद वाली विश्वरूपा सरस्वती प्रादुर्भूत हुई थी। यह विश्व की माला और अवरी को धारण करने वाली थी तथा विश्व के ही उपवीत को धारण किये हुए थी ॥३॥ विश्व के उष्णीष वाली, विश्वगन्धा, विश्वमाता और महान् ओष्ठ वाली थी। उसने उस प्रकार के स्वरूप वाले भवानीशान परमेश्वर को जो शुद्ध स्फटिक मणि के सदृश और समस्त आभरणों से भूषित थे, युक्तात्मा पितामह ने मनके द्वारा ध्यान किया था और सबके स्वामी, सर्वत्र गमन करने वाले प्रभु देव की वन्दना की थी, हे ओमीशान ! आपको मेरा प्रणाम है। हे महादेव ! आपको मेरा नमस्कार है ॥४॥ ॥५॥६॥ हे समस्त विद्याओं को ईशान ! हे परमेश्वर ! आपको नमस्कार है। हे वृष वाहन ! समस्त प्राणियों के स्वामी आपको मेरा नमस्कार है ॥७॥ हे ब्रह्म के अधिपति ! ब्रह्मरूपी ब्रह्म आपको मेरा नमस्कार है।

ब्रह्म के अधिपति के लिए मेरा प्रणाम है। हे सदाशिव ! मेरा कल्याण होवे ।।८।। हे ओङ्कार मूर्ति वाले ! हे देवेश ! हे सद्योजात, आपके लिए मेरा बारम्बार नमस्कार है। मैं आपकी शरण मे आता हूं और मैं प्रपन्न हो गया हूं। सद्योजात आपके लिए नमस्कार है।।६।।

अभवे च भवे तुभ्यं तथा नातिभवे नमः।
भवोद्भव भवेशान मां भजस्व महाद्युते ।।१०।।
वामदेव नमस्तुभ्यं ज्येष्ठाय वरदाय च।
नमो रुद्राय कालाय कलनाय नमो नमः ।।११।।
नमो विक रणायैव कालवर्णाय वर्णिने।
बलाय बलिनां नित्यं सदा विकरणाय ते ।।१२।।
बलप्रमथनायैव बलिने ब्रह्मरूपिणे।
सर्वभूतेश्व रेशाय भूतानां दमनाय च।।१३।।
मनोन्मनाय देवाय नमस्तुभ्यं महाद्युते।
वामदेवाय वामाय नमस्तुभ्यं महात्मने ।।१४।।
ज्येष्ठाय चैव श्रेष्ठाय रुद्राय वरदाय च।
कालहन्त्रे नमस्तुभ्यं नमस्तुभ्यं महात्मने ।।१५।।

अभव, भव और नातिभव मे आपके लिये मेरा नमस्कार है। हे भवोद्भव ! हे भवेशान ! हे महाद्युते ! मेरा भजन करें।।१०।। हे वामदेव ! ज्येष्ठ और वरद आपके लिये मेरा नमस्कार है। रुद्र, काल और कलन आपको बारम्बार नमस्कार है।।११।। विकरण, कालवर्ण और वर्णी, बलियों के बलस्वरूप तथा सदा विकरण रूप आपके लिए मेरा नित्य नमस्कार है।।१२।। बल के प्रमथन करने वाले, बली, ब्रह्मरूप वाले, समस्त भूतों के ईश्वर और भूतों के दमन करने वाले आपके लिए मेरा नमस्कार है।।१३।। हे महाद्युते ! मनोन्मन देव आपको मेरा नमस्कार है। वामदेव, वाम और महान् आत्मा वाले आपके लिए मेरा नमस्कार है

॥१४॥ ज्येष्ठ, श्रेष्ठ, रुद्र और वरद, काल के हनन करने वाले महात्मा आपके लिए मेरा वारम्वार नमस्कार है ॥१५॥

इति स्तवेन देवेशं ननाम वृषभध्वजम् ।
यः पठेत् सकृदेवेह ब्रह्मलोकं गमिष्यति ॥१६॥
श्रावयेद्वा द्विजान् श्राद्धे स याति परमां गतिम् ।
एवं ध्यानगतं तत्र प्रणमंत पितामहम् ॥१७॥
उवाच भगवानीशः प्रीतोहं ते किमिच्छसि ।
ततस्तु प्रणतो भूत्वा वाग्विशुद्ध महेश्वरम् ॥१८॥
उवाच भगवान् रुद्र प्रीतं प्रीतेन चेतसा ।
यदिदं विश्वरूपं ते विश्वगौः श्रेयसीश्वरी ॥१९॥
एतद्वेदितुमिच्छामि यथेयं परमेश्वर ।
कैषा भगवती देवी चतुष्पादा चतुर्मुखी ॥२०॥
चतुःश्रृङ्गी चतुर्वक्का चतुर्दंष्ट्रा चतुस्तनी ।
चतुर्हस्ता चतुर्नेत्रा विश्वरूपा कथ स्मृता ॥२१॥

इस स्तव के द्वारा देवेश वृषभध्वज को ब्रह्मा ने प्रणाम किया था। जो इस स्तव का एक वार भी यहाँ पाठ कर लेगा वह ब्रह्मलोक को चला जायगा। अथवा श्रद्धा के भाव मे जो इसका द्विजो को श्रवण कराता है वह परमगति को प्राप्त किया करता है। इस प्रकार से ध्यान में स्थित पितामह को प्रणाम करते हुए देख कर भवानीश ने कहा कि मैं तुमसे परम प्रसन्न हूँ, बोल, तू अब क्या चाहता है ? इसके पश्चात् वाग्वि शुद्ध महेश्वर को ब्रह्मा ने प्रणाम किया था ॥१६॥१७॥ ॥१८॥ और फिर भगवान् ब्रह्मा ने प्रसन्न चित्त से युक्त परम प्रसन्न रुद्र से कहा कि यह जो आपका विश्वरूप है और श्रेय करने वाली यह विश्व गौ है। हे परमेश्वर ! मैं इसको जानना चाहता हूं कि जिस प्रकार से यह है। यह भगवती देवी कौन है जिसके चार पैर हैं, चार मुख हैं, चार सींग हैं और जो चतुर्वक्त्रा, चतुर्दंष्ट्रा और चतुस्तना है

तथा चतुर्हस्ता, चतुर्नेत्रा है। यह विश्वरूपा कैसे कही गई है ॥१६॥
॥२०॥२१॥

किंनामगोत्रा कस्येयं किंवीर्या चापि कर्मतः।
तस्य तद्वचनं श्रुत्वा देवदेवो वृषध्वजः ॥२२॥
प्राह देववृषं ब्रह्मा ब्रह्माणं चात्मसंभवम्।
रहस्यं सर्वमंत्राणां पावनं पुष्टिवर्धनम् ॥२३॥
शृणुष्वैतत्परं गुह्यमादिसर्गे यथा तथा।
एव यो वर्तते कल्पो विश्वरूपस्त्वसौ मतः ॥२४॥
ब्रह्मस्थानमिद चापि यत्र प्राप्तं त्वया प्रभो।
त्वत्तः परतरं देव विष्णुना तत्पदं शुभम् ॥२५॥
वैकुंठेन विशुद्धेन मम वामांगजेन वै।
तदाप्रभृति कल्पश्च त्रयस्त्रिंशत्तमो ह्ययम् ॥२६॥
शत शतसहस्राणामतीता ये स्वयंभुवः।
पुरस्तात्तव देवेश तच्छृणुष्व महामते ॥२७॥
आनंदस्तु स विज्ञेय आनंदत्वे व्यवस्थितः।
मांडव्यगोत्रस्तपसा मम पुत्रत्वमागतः ॥२८॥

इस देवी का क्या नाम और गोत्र है—यह किसकी है ? क्या इसका पराक्रम है और इसका कर्म क्या है ?। उस ब्रह्मा के इस वचन का श्रवण करके देवों के देव वृषध्वज देवों में श्रेष्ठ,आत्म सम्भव ब्रह्मा से बोले—यह समस्त मन्त्रों के मध्य में परम पावन एवं अत्यन्त गोपनीय रहस्य है ।२२।२३। तथापि इस परम गोपनीय का तुम श्रवण करो । आदि सर्ग में जिस प्रकार का भी यह कल्प है यह विश्वरूप कहा गया है ॥२४॥ हे प्रभो ! यह ब्रह्म स्थान है जिसको कि आपने प्राप्त किया है । आपसे भी परतर देव विष्णु हैं और उनका शुभ स्थान इससे भी ऊपर है । ॥२५॥ विशुद्ध वैकुण्ठ मेरे वामाङ्गज के द्वारा किया हुआ है । तबसे लेकर यह तेतीसवाँ कल्प है ॥२६॥ हे देवेश ! आपसे भी पहिले सात

सहस्रों के शत स्वयम्भू हो चुके हैं। हे महामते! अब तुम उनका श्रवण करो ॥२७॥ माण्डव्य गोत्र वाले तुम तप के द्वारा मेरे पुत्र हुए थे और आनन्द के रूप में व्यवस्थित हुए थे अतएव वह ब्रह्म रूप आनन्द जानने के योग्य हैं ॥२८॥

त्वयि योगं च सांख्यं च तपोविद्याविधिक्रियाः।
ऋतं सत्यं दया ब्रह्म अहिंसा सन्मतिः क्षमा ॥२९॥
ध्यानं ध्येयं दमः शांतिर्विद्याऽविद्या मतिर्धृतिः।
कांतिर्नीतिः प्रथा मेधा लज्जा दृष्टिः सरस्वती ॥३०॥
तुष्टिः पुष्टिः क्रिया चैव प्रसादश्च प्रतिष्ठिताः।
द्वात्रिंशत्सुगुणा ह्येषा द्वात्रिंशाक्षरसंज्ञया ॥३१॥
प्रकृतिर्विहिता ब्रह्मंस्त्वत्प्रसूति महेश्वरी।
विष्णोर्भगवतश्चापि तथान्येषामपि प्रभो ॥३२॥
सैषा भगवती देवी मत्प्रसूतिः प्रतिष्ठिता।
चतुर्मुखी जगद्योनिः प्रकृतिर्गौः प्रतिष्ठिता ॥३३॥
गौरी माया च विद्या च कृष्णा हैमवतीति च।
प्रधानं प्रकृतिश्चैव यामाहुस्तत्त्वचिंतकाः ॥३४॥
अजामेकां लोहितां शुक्लकृष्णां विश्वप्रजां सृजमाना सरूपाम्।
अजोहं मां विद्धि तां विश्वरूपं गायत्री गां विश्वरूपा हि बुद्धया ॥३५॥

उस समय में तुम मे बत्तीस गुण थे और उनके नाम ये हैं—योग, साख्य, कृच्छ्र आदि तप और उनकी विधि तथा क्रिया, ऋत [प्रिय भाषण], सत्य, दया, ब्रह्म [वेद], अहिंसा [पर पीडा का त्याग], सन्मति [अव्यभिचारिणी बुद्धि], क्षमा [पराई पीडा का सहन करना], ध्यान, ध्येय [ईश्वर का सन्निधान], दम, शान्ति, विद्या, अविद्या, मति, धृति, कान्ति, नीति, प्रथा [ख्याति], मेधा [धारणा करने वाली बुद्धि], लज्जा [लोको के अपवाद का भय], दृष्टि, [दिव्यज्ञान], सरस्वती, तुष्टि, पुष्टि, [इन्द्रियों की पटुता], क्रिया [वेद विहित धर्म और प्रसाद] बत्तीस

अक्षरो की संज्ञा से यह बत्तीस गुणों वाली यह विश्वरूपा महेश्वरी आपकी प्रसूति प्रकृति मैंने हे ब्रह्मन् ! तुम्हारे ही लिए उत्पन्न की है। हे प्रभो ! यह भगवान् विष्णु और अन्य इन्द्र आदि की यह मेरी प्रसूति भगवती देवी जननी है। यह जगत् की योनि चतुर्मुखी प्रकृति गौ के स्वरूप मे प्रतिष्ठित है ॥२६॥३०॥३१॥३२॥३३॥ तत्त्वो के चिन्तन करने वाले जिस प्रकृति को गौरी, माया, विद्या, कृष्ण, हैमवती प्रधान और प्रकृति इन नामो से कहा करते हैं ॥३४॥ उसको अजा, एका, लोहिता, शुक्ल कृष्ण, विश्व प्रजा, सृजमाना, सरूपा, विश्वरूपा, गौ, गायत्री बुद्धि से समझो और मैं अज हूँ ऐसा मुझको भी जान लो ॥३५॥

एवमुक्त्वा महादेवः ससर्ज परमेश्वरः।
ततश्च पार्श्वगा देव्याः सर्वरूपकुमारकाः ॥३६॥
जटो मुंडी शिखंडी च अर्धमुंडश्च जज्ञिरे।
ततस्तेन यथोक्तेन योगेन सुमहौजसः ॥३७॥
दिव्यवर्षसहस्राते उपासित्वा महेश्वरम्।
धर्मोपदेशमखिल कृत्वा योगमयं दृढम् ॥३८॥
शिष्टाश्च नियतात्मानः प्रविष्टा रुद्रमीश्वरम् ॥३९॥

इस प्रकार से परमेश्वर महादेव ने कह कर सृजन किया था। और इसके अनन्तर देवी के पार्श्व मे गमन करने वाले सर्वरूप कुमार जटी, मुण्डी, शिखण्डी और अर्घ मुण्ड उत्पन्न हुए थे। इसके अनन्तर यथोक्त योग के द्वारा महान् ओज वाले वे एक सहस्र दिव्य वर्ष तक वहा रह कर तथा महेश्वर की उपासना करके सम्पूर्ण योगमय दृढ धर्म का उपदेश करके वे शिष्ट नियत आत्मा वाले ईश्वर रुद्र मे प्रविष्ट हो गये थे ॥३६॥३७॥३८॥३९॥

श्री विष्णु नाभि कमल से ब्रह्मोत्पत्ति

कथं पाद्मे पुरा कल्पे ब्रह्मा पद्मोद्भवोऽभवत् ।
भवं च दृष्टवांस्तेन ब्रह्मणा पुरुषोत्तमः ॥१॥
एतत्सर्वं विशेषेण सांप्रतं वक्तुमर्हसि ।
आसीदेकार्णवं घोरमविभागं तमोमयम् ॥२॥
मध्ये चैकार्णवे तस्मिन् शङ्खचक्रगदाधरः ।
जीमूताभोऽम्बुजाक्षश्च किरीटी श्रीपतिर्हरिः ॥३॥
नारायणमुखोद्गीर्णसर्वात्मा पुरुषोत्तमः ।
अष्टबाहुर्महावक्षा लोकानां योनिरुच्यते ॥४॥
किमप्यचिन्त्यं योगात्मा योगमास्थाय योगवित् ।
फणासहस्रकलितं तमप्रतिमवर्चसम् ॥५॥
महाभोगपतेर्भोगं साध्वास्तीर्य महोच्छ्रयम् ।
तस्मिन्महति पर्यंके शेते चैकार्णवे प्रभुः ॥६॥
एवं तत्र शयानेन विष्णुना प्रभविष्णुना ।
आत्मारामेण क्रीडार्थं लीलयाक्लिष्टकर्मणा ॥७॥
शतयोजनविस्तीर्णं तरुणादित्यसन्निभम् ।
वज्रदंडं महोत्सेधं नाभ्यां सृष्टं तु पुष्करम् ॥८॥

ऋषियों ने कहा—पहिले पाद्म कल्प मे पद्मोद्भव ब्रह्मा कैसे हुए थे और उस ब्रह्मा के साथ पुरुषोत्तम ने भव को किस प्रकार से देखा था ? ॥१॥ यह सब अब हमारे सामने वर्णन करने के योग्य होते हैं। सूत जी ने कहा—उस समय एक ही समुद्र था जो महान् घोर, बिना विभाग वाला एकदम अन्धकार से परिपूर्ण था ॥२॥ उस एकार्णव के मध्य मे शङ्ख, चक्र, गदा के धारण करने वाले, मेघ के समान क्रान्ति से युक्त, कमल के सदृश नेत्रों से समन्वित किरीटधारी लक्ष्मी के पति हरि थे ॥३॥ नारायण के मुख से उद्गीर्ण सर्वात्मा पुरुषोत्तम आठ

बाहुओं वाले, महान् वक्ष स्थल वाले समस्त लोकों की योनि कहे जाते हैं।।४।। योग के पूर्ण ज्ञाता और योग की आत्मा किसी अचिन्त्य योग मे आस्थित होकर एक सहस्र फणो से युक्त उस अप्रतिम वर्चस वाला जो महा भोग पति शेष का भोग था जिसको महान उच्छ्रय वाले भोग को भली भाँति आस्तृत कर रक्खा था उस महान् पर्यङ्क पर प्रभु उस एकार्णव मे शयन कर रहे थे ।।५।।६।। इस प्रकार से वहाँ पर शयन करने वाले प्रभविष्णु विष्णु ने जो कि अपनी ही आत्मा मे रमण करने वाले हैं और अक्लिष्टकर्म करने वाले हैं क्रीडा करने के लिये लीला से एक सौ योजन के विस्तार से युक्त और तरुण सूर्य के समान, वज्र के दण्ड वाला महान् उत्सेध [ऊँचाई] से युक्त नाभि मे कमल का सृजन किया था ।।७।।८।।

तस्यैव क्रीडमानस्य समीप देवमीढुप ।
हेमगर्भाडजो ब्रह्मा रुक्मवर्णो ह्यतीद्रिय ।।६।।
चतुर्वक्त्रो विशालाक्ष समागम्य यदृच्छया ।
श्रिया युक्तेन दिव्येन सुशुभेन सुगधिना ।।१०।।
क्रीडमान च पद्मेन दृष्ट्वा ब्रह्मा शुभेक्षणम् ।
सविस्मयमथागम्य सौम्यसपन्नया गिरा ।।११।।
प्रोवाच को भवाञ्छेते ह्याश्रितो मध्यमभसाम् ।
अथ तस्याच्युत श्रुत्वा ब्रह्मणस्तु शुभ वच ।।१२।।
उदतिष्ठत पर्यंकाद्विस्मयोत्फुल्ललोचन ।
प्रत्युवाचोत्तर चैव कल्पेकल्पे प्रतिश्रय ।।१३।।
कर्तव्य च धृत चैव क्रियते यच्च किंचन ।
द्यौरतरिक्ष भूश्चैव पर पदमह भुव ।।१४।।

देवो म परम श्रेष्ठ क्रीडा करते हुए उस भगवान् विष्णु के समीप म हेमगर्भ अण्ड से जन्म ग्रहण करने वाला ब्रह्मा, जो रुक्म के समान

वर्ण वाला, अतीन्द्रिय, चार मुखों से युक्त और विशाल नेत्रों वाला था, यदृच्छा से आ गया था और उस ब्रह्मा ने वहाँ पर श्री से समान्न, सुगन्ध वाले, परम शुभ और दिव्य पद्म से क्रीडा करते हुए शुभ ईक्षण वाले शेषशायी को देखा था फिर विस्मय पूर्वक वहाँ आकर परम सौम्यता से युक्त वाणी से ब्रह्मा ने कहा ।।६।।१०।।११।। आप कौन हैं जो यहाँ समुद्र के जलों के मध्य आश्रय ग्रहण कर शयन कर रहे हैं ? इस ब्रह्मा के प्रश्न के अनन्तर भगवान् अच्युत ने ब्रह्मा के इस शुभ वचन का श्रवण कर वे विस्मय से उत्फुल्ल (खिले हुये) लोचन वाले अच्युत अपने शेष के पर्यङ्क से उठ खड़े हुये थे और उन्होंने उसके प्रश्न का उत्तर दिया था कि कल्प-कल्प मे कौन सा जगत् के निवास का स्थान रहता है ।।१२।। ।।१३।। दिवलोक, अान्तरिक्ष और भूमि इनमे जो भी कुछ कर्तव्य है और किया है तथा किया जा रहा है उसे बताया और कहा मैं भूलोक का परम पद हू ।।१४।

तमेवमुक्त्वा भगवान् विष्णुः पुनरथाब्रवीत् ।
कस्त्व खलु समायातः समीप भगवान्कुतः ।।१५।।
क्व वा भूयश्च गतव्यं कश्च वा ते प्रतिश्रयः ।
को भवान् विश्वमूर्तिर्वै कर्तव्यं किं च ते मया ।।१६।।
एवं ब्रु वंतं वकुंठं प्रत्युवाच पितामहः ।
मायया मोहितः शंभोरविज्ञाय जनार्दनम् ।।१७।।
मायया मोहितं देवमविज्ञातं महात्मनः ।
यथा भवांस्तथैवाहमादिकर्ता प्रजापतिः ।।१८।।
सविस्मयं वचः श्रु त्वा ब्रह्मणो लोकतन्त्रिणः ।
अनुज्ञातश्च ते नाथ वैकुंठो विश्वसम्भवः ।।१९।।
कौतूहलान्महायोगी प्रविष्टो ब्रह्मणो मुखम् ।
इमानष्टादश द्वीपान्ससमुद्रान् सपर्वतान् ।।२०।।
प्रविश्य सुमहातेजाश्चातुर्वर्ण्यसमाकुलान् ।
ब्रह्मणस्तवपर्यंतं सप्तलोकान् सनातनान् ।।२१।।

ब्रह्मणस्तूदरे दृष्ट्वा सर्वान्विष्णुर्महाभुजः ।
अहोस्य तपसो वीर्यमित्युक्त्वा च पुनः पुनः ॥२२॥
अटित्वा विविधाँल्लोकान् विष्णुर्नानाविधाश्रयान् ।
ततो वर्षसहस्रांते नांतं हि ददृशे यदा ॥२३॥

भगवान् विष्णु ने उस ब्रह्मा से यह इस प्रकार से कह कर फिर कहा — आप कौन हैं और कहाँ से मेरे समीप मे आये हैं ॥१५॥ अब आगे आपको कहाँ जाना है और आपके निवास का मुख्य स्थान कौन सा है। आप विश्वमूर्ति कौन हैं और मुझसे आपको क्या काम है ॥१६॥ इस तरह से बोलने वाले वैकुण्ठनाथ से पितामह ने कहा कि मैं जनार्दन का ज्ञान प्राप्त न करके भगवान् शम्भु की माया से मोहित हो गया हूं ॥१७॥ महात्मा की माया से मोहित देव को मैंने विज्ञात नही किया है। जिस प्रकार के आप हैं वैसा ही मैं आदि कर्त्ता प्रजापति हूँ ॥१८॥ ब्रह्मा के जो कि लोकतन्त्र का आश्रय है, विस्मय के साथ यह वचन श्रवण करके हे नाथ ! विश्व सम्भव वैकुण्ठ अनुज्ञात हो गये थे ॥१९॥ वह महायोगी कौतूहल से ब्रह्मा के मुख में प्रविष्ट हो गया था। वहाँ पर महाभुज महा तेज वाले विष्णु ने इन अठारह द्वीपो को जो पर्वतो से और समुद्रो से युक्त थे तथा चारो वर्णों से समाकुल थे, और ब्रह्मा से स्तम्ब पर्यन्त सनातन सातो लोको को सबको ब्रह्मा के उदर मे देखा था। वहाँ पर विष्णु को ये सब देखकर बड़ा ही आश्चर्य हुआ और बार-बार यही कहते हुए कि "इसके तप की कैसी अद्भुत शक्ति है" विष्णु ने अनेक प्रकार के आश्रय वाले विविध लोको का ब्रह्मा के उदर में भ्रमण किया था किन्तु सहस्रो वर्ष तक अटन करने पर विष्णु ने उनका अन्त नही देखा था ॥२०॥२१॥२२॥२३॥

तदास्य वक्त्रान्निष्क्रम्य पन्नगेंद्रनिकेतनः ।
नारायणो जगद्धाता पितामहमथाब्रवीत् ॥२४॥
भगवानादिरंतश्च मध्य कालो दिशो नभः ।
नाहमंतं प्रपश्यामि उदरस्य तवानघ ॥२५॥

एवमुक्त्वाब्रवीद्भूय. पितामहमिद हरिः ।
भगवानेवमेवाह शाश्वत हि ममोदरम् ॥२६॥
प्रविश्य लोकान् पश्यंताननौपम्यान्सुरोत्तम ।
ततः प्राह्लादिनी वाणी श्रु त्वा तस्याभिनंद्य च ॥२७॥
श्रीपतेरुदर भूयः प्रविवेश पितामहः ।
तानेव लोकान् गर्भस्था नपश्यत्सत्यविक्रमः ॥२८॥
पर्यटित्वा तु देवस्य ददृशेऽन्त न वै हरेः ।
ज्ञात्वा गति तस्य पितामहस्य
द्वाराणि सर्वाणि पिधाय विष्णुः ।
विभुर्मनः कर्तु मियेष चाशु
सुख प्रसुप्तोहमिति प्रचिन्त्य ॥२९॥
ततो द्वाराणि सर्वाणि पिहितानि समीक्ष्य वै ।
सूक्ष्म कृत्वात्मनो रूपं नाभ्या द्वारमविदत ॥३०॥

जब कोई अन्त नही मिला तो पन्नगो के स्वामी शेष के निकेतन वाले, जगत् के धाता नारायण इस ब्रह्मा के मुख से बाहिर निकल आए और इसके पश्चात् पितामह से बोले ॥२४॥ हे अनघ ! आप तो आदि, मध्य और अन्त हैं तथा काल, दिशा और नभ हैं । मैं तो आपके उदर का कहीं भी अन्त नही देख रहा हू ॥२५॥ इतना कह कर हरि ने पितामह से पुन कहा—इस प्रकार से मैं भगवान् ही हूँ और मेरा उदर भी शास्वत है ॥२६॥ हे सुरोत्तम ! आप भी मेरे उदर मे प्रवेश करके अनुपम इन लोको को देख लेवें । इसके अनन्तर पितामह ने नारायण की प्राह्लादिनी वाणी का श्रवण करके और उनका अभिनन्दन करके वह पितामह पुन. श्रीपति के उदर मे प्रविष्ट हो गये थे । वहाँ पर सत्य विक्रम वाले परमेष्ठी ने गर्भस्थ उन्ही लोको को देखा था ॥२७॥२८॥ ब्रह्मा ने वहाँ पर पर्यटन किया था किन्तु देव हरि के अन्त को उनने नही देखा था । उस पितामह की गति को जानकर विष्णु ने

समस्त द्वारो को पिहित कर दिया था। फिर विभु ने मैं सुख पूर्वक प्रसुप्त हो गया हूँ। ऐसा चिन्तन करके शीघ्र ही मन मे इच्छा की थी ॥२९॥ इसके पश्चात् नारायण के शरीर मे समस्त द्वारो को बन्द देखकर पितामह ने अपना सूक्ष्म स्वरूप बनाया और नारायण की नाभि मे द्वारा प्राप्त किया था ॥३०॥

पद्मसूत्रानुसारेण चान्वपश्यत्पितामहः ।
उज्जहारात्मनो रूप पुष्कराच्चतुराननः ॥३१॥
विरराजारविदस्थः पद्मगर्भसमद्युतिः ।
ब्रह्मा स्वयभूर्भगवाञ्जगद्योनिः पितामह. ॥३२॥
एतस्मिन्नंतरे ताभ्यामेकैकस्य तु कृत्स्नशः ।
वर्तमाने तु सघर्षे मध्ये तस्यार्णवस्य तु ॥३३॥
कुतोप्यपरिमेयात्मा भूताना प्रभुरीश्वरः ।
शूलपाणिर्महादेवो हेमवीरावरच्छदः ॥३४॥
अगच्छद्यत्र सोनतो नागभोगपतिर्हरिः ।
शीघ्रं विक्रमतस्तस्य पद्भ्यामाक्रांतपीडिता. ॥३५॥
उद्भूतास्तूर्णमाकाशे पृथुलास्तोयबिंदवः ।
अत्युष्णश्चातिशतिश्च वायुस्तत्र ववौ पुनः ॥३६॥
सदृष्ट्वा महदाश्चर्यं ब्रह्मा विष्णुमभ पत ।
अब्बिदवश्च शीतोष्णा. कपयत्यबुज भृशम् ॥३७॥

पितामह ने पद्म के सूत्र के अनुसार उस नाभि के द्वार को देखा था और फिर चतुरानन ने उस कमल से अपने स्वरूप को प्रकट किया था ॥३१॥ जगत् की योनि, भगवान् स्वयम्भू पितामह ब्रह्मा पद्म के गर्भ के समान द्युति वाला अरविन्द मे स्थित होता हुआ भ्राजमान हुआ था ॥३२॥ उस समुद्र के मध्य मे उन पद्म के पत्रो में प्रत्येक का ब्रह्मा के भार से आक्रान्त होने के कारण परस्पर मे सङ्घर्ष उत्पन्न हो गया था ॥३३॥ उस समय जहाँ पर जगभोग के पति अनन्त हरि थे

वहाँ कही से अपरिमेय आत्मा वाले भूतो के प्रभु, ईश्वर, श्रेष्ठ सुवर्ण के अम्बर छद वाले शूलपाणि महादेव जा पहुचे थे। शीघ्र चलने वाले उसके पैरों से आक्रान्त हुए एवं पीडित स्थूल जल की बूँदें शीघ्र ही आकाश मे उद्भूत हो गई थी। वहाँ उस समय मे अत्यन्त उष्ण और अत्यन्त शीत वायु फिर वहन होने लगी थी ॥३४॥३५॥३६॥ इस महान् आश्चर्य को देखकर ब्रह्मा ने विष्णु से कहा था कि ये जल के कण शीत और उष्ण है और यदि इस अम्बुज को अत्यन्त कम्पित कर रहे हैं ॥३७॥

एतन्मे संशयं ब्रूहि किं वा त्वन्यच्चिकीर्षसि ।
एतदेवंविधं वाक्यं पितामहमुखोद्गतम् ॥३८॥
श्रुत्वाप्रतिमकर्मा हि भगवानसुरांतकृत् ।
किं नु खल्वत्र मे नाभ्या भूतमन्यत्कृतालयम् ॥३९॥
वदति प्रियमत्यर्थं मन्युश्चास्य मया कृतः ।
इत्येवं मनसा ध्यात्वा प्रत्युवाचेदमुत्तरम् ॥४०॥
किमत्र भगवानद्य पुष्करे जातसंभ्रमः ।
किं मया च कृतं देव यन्मां प्रियमनुत्तमम् ॥४१॥
भाषसे पुरुषश्रेष्ठ किमर्थं ब्रूहि तत्त्वतः ।
एवं ब्रुवाणं देवेशं लोकयात्रानुगं ततः ॥४२॥
प्रत्युवाचाम्बुजाभाक्षं ब्रह्मा वेदनिधिः प्रभुः ।
योऽसौ तवोदरं पूर्वं प्रविष्टोऽहं त्वदिच्छया ॥४३॥
यथा ममोदरे लोकाः सर्वे दृष्टास्त्वया प्रभो ।
तथैव दृष्टाः कात्स्न्येन मया लोकास्तवोदरे ॥४४॥

ब्रह्माजी ने विष्णु भगवान् से कहा कि मुझे बहुत संशय हो रहा है। इसे आप स्पष्ट बताइये। क्या आप कुछ और करना चाहते हैं? इस प्रकार के पितामह के मुख से उद्गत वाक्य का श्रवण करके अप्रतिम कर्म वाले तथा असुरो के अन्तकारी भगवान् ने सोचा कि मेरी

नाभि में अन्य के द्वारा आतप करने पर यह क्या हो गया है ॥३८॥३६॥ यह ब्रह्मा बोलता तो बहुत ही प्रिय है किन्तु इसका क्रोध मैंने किया है। इस प्रकार से मन मे सोचकर फिर विष्णु ने यह उत्तर दिया था ॥४०॥ आज इस कमल में आपको क्यों सम्भ्रम उत्पन्न हो गया है ? हे देव ! मैंने आपका क्या अपराध किया है कि आप मुझसे ऐसा अनुत्तम एवं अप्रिय वचन बोल रहे हैं। हे पुरुषों में श्रेष्ठ ! आप मुझे किसलिये ऐसा कहते हैं—इसे यथार्थ रूप से बताइये। इस प्रकार से बोलने वाले और लोकों की यात्रा का अनुगमन करने वाले तथा अम्बुज के समान नेत्रों वाले देवेश से वेदों के निधि ब्रह्मा ने कहा—मैं आपकी ही इच्छा से ही पहिले आपके उदर में प्रविष्ट हुआ था ॥४१॥४२॥४३॥ जिस प्रकार से हे प्रभो ! मेरे उदर मे आपने समस्त लोक देखे थे उसी भाँति आपके उदर मे मैंने पूर्णतया सब लोक देखे थे ॥४४॥

ततो वर्षसहस्रात्तु उपावृत्तस्य मेऽनघ ।
त्वया मत्सरभावेन मां वशीकर्तुमिच्छता ॥४५॥
आशु द्वाराणि सर्वाणि पिहितानि समंततः ।
ततो मया महाभाग संचित्य स्वेन तेजसा ॥४६॥
लब्धो नाभिप्रदेशेन पद्मसूत्राद्विनिर्गमः ।
माभूत्ते मनसोऽल्पोपि व्याघातोऽस्य कथंचन ॥४७॥
इत्येषानुगतिर्विष्णो कार्याणामौपसर्पिणी ।
यन्मयानतरं कार्यं ब्रूहि किं करवाण्यहम् ॥४८॥
ततः परममेयात्मा हिरण्यकशिपो रिपुः ।
अनवद्यां प्रियामिष्टां शिवां वाणीं पितामहात् ॥४६॥
श्रुत्वा विगतमात्सर्यं वाक्यमस्मै ददौ हरिः ।
न ह्येवमीदृशं कार्यं मयाध्यवसितं तव ॥५०॥
त्वां बर्धयितुकामेन क्रीडापूर्वं यदृच्छया ।
आशु द्वाराणि सर्वाणि घटितानि मयात्मनः ॥५१॥

हे अनघ ! इसके अनन्तर एक सहस्र वर्ष पर्यन्त भ्रमण करने वाला वहाँ आपके उदर मे रहा था । मत्सरता के भाव से मुझको वश्य करने की इच्छा रखने वाले आपने सभी ओर से बहुत शीघ्र समस्त द्वारा बन्द कर दिये थे । हे महाभाग ! मैंने अपने ही तेज से भली-भाँति चिन्तन करके नाभि के प्रदेश के द्वारा पद्म सूत्र से विनिर्गम अर्थात् निकलने का मार्ग प्राप्त किया था । आपके मन मे किसी भी प्रकार से थोडा सा भी यह व्याघात नही होवे ॥४५॥४६॥४७॥ यह विष्णु के कार्यों की अनुकूल अनुगति है । इसके अनन्तर जो कुछ भी मुझे करना चाहिए उसे बताइये कि मैं अब क्या करूँ ॥४८॥ इसके अनन्तर अमेर आत्मा वाले हिरण्यकशिपु दैत्य के शत्रु विष्णु ने पितामह से निर्दोष, प्रिय, अभीष्ट, मङ्गलमयी वाणी का श्रवण किया था और फिर हरि ने ब्रह्मा को मात्सर्य से रहित वाक्य कहा था । ऐसा कोई भी कार्य नहीं है जो मैंने आपको करने के लिए निश्चित किया हो । ॥४९॥५०॥ आपको ज्ञान प्राप्त कराने के लिये ही मेरी इच्छा हुई थी और इसी से यदृच्छा वश क्रीडा पूर्वक मैंने अपने समस्त द्वार शीघ्र बन्द कर दिये थे ॥५१॥

न तेऽन्यथावगन्तव्यं मान्यः पूज्यश्च मे भवान् ।
सर्वं मर्षय कल्याण यन्मयापकृतं तव ॥५२॥
अस्मान् मयोह्यमानस्त्वं पद्मादवतर प्रभो ।
नाहं भवन्तं शक्नोमि सोढुं तेजोमयं गुरुम् ॥५३॥
सहोवाच वरं ब्रूहि पद्मादवतर प्रभो ।
पुत्रो भव ममारिघ्न मुदं प्राप्स्यसि शोभनम् ॥५४॥
सद्भाववचनं ब्रूहि पद्मादवतर प्रभो ।
स त्वं च नो महायोगी त्वमीड्यः प्रणवात्मकः ॥५५॥
अद्यप्रभृति सर्वेशः श्वेतोष्णीषविभूषितः ।
पद्मयोनिरिति ह्येवं ख्यातो नाम्ना भविष्यसि ॥५६॥

पुत्रो मे त्वं भव ब्रह्मन् सप्तलोकाधिपः प्रभो ।
ततः स भगवान्देवो वरं दत्वा किरीटिने ॥५७॥
एवं भवतु चेत्युक्त्वा प्रीतात्मा गतमत्सरः ।
प्रत्या सन्नमथायांतं बालार्काभं महाननम् ॥५८॥

इसके बिना अन्य किसी प्रकार से आपको यह ज्ञान नहीं हो सकता था । वैसे आप मेरे मान्य और पूज्य हैं । हे कल्याण ! इस सबको अब आप क्षमा कर दीजिए जो कुछ मैंने आपका अपकार किया है ॥५२॥ हे प्रभो ! इस समय आप मेरे द्वारा वहन किए जा रहे हो । इसलिये इस पद्म से आप नीचे उतर जाइये । आपका स्वरूप तेज से परिपूर्ण हैं और आप गुरु हैं । मैं आपको वहन नहीं कर सकता हूं । ॥५३॥ उस ब्रह्मा ने कहा—हे प्रभो ! आप मुझे इस पद्म से नीचे उतार दीजिए और स्थापित कर देवें तथा वरदान दीजिये। विष्णु ने कहा—हे अरिघ्न ! आप मेरे पुत्र हो जाओ । इससे आपको बहुत ही शोभन आनन्द प्राप्त होगा । हे प्रभो ! आप सद्भाव से पूर्ण वचन हम से बोलिये और इस पद्म से नीचे उतर जाइए । आप तो महान् योगी हैं । आप प्रणव रूप हैं और इसीलिए हमारे स्तवन करने के योग्य हैं ॥५४॥५५॥ आज से लेकर आप सबके ईश और श्वेत उष्णीष से विभूषित होंगे और 'पद्मयोनि'—इस नाम से लोकों में विख्यात होंगे ॥५६॥ हे प्रभो ! हे ब्रह्मन् ! आप मेरे पुत्र हो जाओ और सात लोकों के स्वामी बन जाओ । इसके अनन्तर भगवान् देव पितामह ने विष्णु को वरदान दिया और कहा कि ऐसा ही होगा और फिर परम प्रसन्न होकर मात्सर्य से रहित हो गए थे । इसके अनन्तर समीप में आते हुए बाल सूर्य के समान आभा से युक्त, महान् आनन (मुख) वाले अत्यन्त अद्भुत भव को देखकर पितामह नारायण से बोले ॥५७॥५८॥

भवमत्यद्भुतं दृष्ट्वा नारायणमथाब्रवीत् ।
अप्रमेयो महावक्त्रो दंष्ट्री ध्वस्तशिरोरुहः ॥५९॥

दशबाहुस्त्रिशूलाङ्को नयनैर्विश्वतः स्थितः ।
लोकप्रभुः स्वयं साक्षाद्विकृतो मुंजमेखली ॥६०॥
मेढ्रेणोर्ध्वेन महता नर्दमानोतिभैरवम् ।
कः खल्वेष पुमान् विष्णो तेजोराशिर्महाद्युतिः ॥६१॥
व्याप्य सर्वा दिशो द्या च इत एवाभिवर्तते ।
तेनैवमुक्तो भगवान् विष्णुर्ब्रह्माणमब्रवीत् ॥६२॥
पद्मा तलनिपातेन यस्य विक्रमतोर्णवे ।
वेगेन महताकाशेप्युत्थिताश्च जलाशयाः ॥६३॥
स्थूलद्भिर्विश्वतोत्यर्थं सिच्यसे पद्मसंभव ।
घ्राणजेन च वातेन कंप्यमान स्त्वया सह ॥६४॥
दोधूयते महापद्मं स्वच्छन्द मम नाभिजम् ।
समागतो भवानीशो ह्यनादिश्चातकृत्प्रभुः ॥६५॥

वराह की दंष्ट्राओं के भूषण वाला, अप्रमेय, महान् वक्त्र से युक्त, फैले हुए केशों वाला, दश बाहुओं से सयुत, त्रिशूल का चिन्ह धारी, सर्वदर्शी, भयङ्कर, मनोहर मेखला को धारण करने वाले स्वय साक्षात् लोकों का स्वामी, उन्नत एव स्थूल मेढ्र से अत्यन्त भीषण नर्दमान होता हुआ, महान् द्युति वाला तेज का पुञ्ज यह हे विष्णो ! कौन पुरुष है ॥५६॥६०॥६१॥ समस्त दिशाओं को व्याप्त करके यह इसी ओर वर्त्तमान हो रहा है। उस पितामह के द्वारा इस प्रकार से कहे गये भगवान् विष्णु ब्रह्मा से बोले ॥६२॥ अर्णव मे चलने वाले जिसके पैरों के तलो के निपात से जलाशय महान् वेग से आकाश मे भी उठ गये हैं ॥६३॥ हे पद्म सम्भव ! अत्यन्त स्थूल जलों के द्वारा यह समस्त विश्व को अत्यन्त अधिक सिञ्चित कर रहा है। इसकी नासिका से निकले हुये वायु से तुम्हारे सहित यह कमल एकदम कम्पित हो रहा है। मेरी नाभि मे उत्पन्न होने वाला यह स्वच्छन्द महा कमल कम्पमान हो रहा है। ऐसा प्रतीत होता है कि भवानी के स्वामी प्रभु आ

गये हैं जो स्वय तो अनादि हैं और समस्त विश्व का अन्त करने वाले हैं ॥६४॥६५॥

भवानहं च स्तोत्रेण उपतिष्ठाव गोध्वजम् ।
ततः क्रुद्धोऽम्बुजाभाक्षं ब्रह्मा प्रोवाच केशवम् ॥६६॥
भवान्न नूनमात्मानं वेत्ति लोकप्रभुं विभुम् ।
ब्रह्माणं लोककर्तारं मां न वेत्सि सनातनम् ॥६७॥
को ह्यसौ शङ्करो नाम आवयोर्व्यतिरिच्यते ।
तस्य तत्क्रोधजं वाक्यं श्रुत्वा हरिरभाषत ॥६८॥
मा मैवं वद कल्याण परिवादं महात्मनः ।
महायोगेंधनो धर्मो दुराधर्षो वरप्रदः ॥६६॥
हेतुरस्याथ जगतः पुराण पुरुषोऽव्ययः ।
बीजी खल्वेष बीजानां ज्योतिरेकः प्रकाशते ॥७०॥
बालक्रीडनकैर्देवः क्रीडते शङ्करः स्वयम् ।
प्रधानमव्ययो योनिरव्यक्तं प्रकृतिस्तमः ॥७१॥
मम चैतानि नामानि नित्यं प्रसवधर्मिणः ।
यः कः स इति दुःखार्तैर्दृश्यते यतिभिः शिवः ॥७२॥

अब आप और मैं दोनो ही स्तोत्र के द्वारा गो ध्वज (शिव) का स्तवन करें। इसके अनन्तर क्रुद्ध ब्रह्मा ने अम्बुजाक्ष केशव से कहा—आप अपनी आत्मा को नहीं जानते हैं कि आप स्वयं लोकों के स्वामी और विभु हैं और मुझको भी नहीं पहिचानते हैं कि मैं समस्त लोको की रचना करने वाला सनातन हूँ ॥६६॥६७॥ यह शङ्कर नाम वाला कौन है जो कि हम दोनो से भी व्यतिरिक्त हैं ? उस ब्रह्मा के क्रोध से उत्पन्न होने वाले वाक्य का श्रवण करके भगवान् हरि ने कहा—हे कल्याण ! ऐसा कभी मत बोलो। यह महान् आत्मा वाले शिव की निन्दा है। महा योग जिसको दीप न करने वाला है, दुरा धर्ष धर्म है और वर प्रदान करने वाला है ॥६८॥६६॥ यह शिव इस जगत् का

हेतु स्वरूप है। पुराण पुरुष, अव्यय, समस्त बीजो का भी यह बीजी है। यह एक ही ज्योनि है जो प्रकाशमान है। भगवान् शङ्कर स्वय इच्चो के खिलौनो से क्रीडा किया करते हैं। प्रधान, अव्यय योनि अव्यक्त, प्रकृतितम ये प्रसव के धर्म वाले मेरे नाम हैं। जो तुमने पूछा है कि यह कौन है वह शिव जन्म-मरणादि दुःख को देखकर विरक्त हो जाने वाले यतियो का द्वारा ही देखा जाया करता है ॥७०॥७१॥७२॥

एष बीजी भवान्बीजमह योनि सनातन ।
स एवमुक्तो विश्वात्मा ब्रह्मा विष्णुमपृच्छत ॥७३॥
भवान् योनिरह बीज कथ बीजी महेश्वर ।
एतन्मे सूक्ष्ममव्यक्त सशय छेत्तु महसि ॥७४॥
ज्ञात्वा च विविधोत्पत्ति ब्रह्मणो लोकतन्त्रिण ।
इम परमसादृश्य प्रश्नमभ्यवदद्धरि ॥७५॥
अस्मान्महत्तर भूत गुह्यमन्यन्न विद्यते ।
महत परम धाम शिवमध्यात्मिना पदम् ॥७६॥
द्विविध चैवमात्मान प्रविभज्य व्यवस्थित ।
निष्कलस्तत्र योऽव्यक्त सकलश्च महेश्वर ॥७७॥
यस्य मायाविधिज्ञस्य अगम्यगहनस्य च ।
पुरा लिंगोद्भव बीज प्रथम त्वादिसर्गिकम् ॥७८॥
मम योनौ समायुक्त तद्बीज कालपर्ययात् ।
हिरण्मयमकूपारे योन्यामडमजायत ॥७९॥
शतानि दशवर्षाणामडमप्सु प्रतिष्ठितम् ।
अन्ते वर्षसहस्रस्य वायुना तद्द्विधा कृतम् ॥८०॥

यह विश्वात्मा यह बीजी है आप बीज हैं और मैं सनातन योनि हूँ, इस प्रकार से कहा गया है। ब्रह्मा ने विष्णु भगवान् से पूछा था ॥७३॥ आप योनि हैं, मैं बीज हू और महेश्वर किस प्रकार से बीजी होते हैं ? यह मेरा सूक्ष्म और अव्यक्त सशय है। उसके छेदन

करने को आप योग्य होते है ।।७४।। लोक तन्त्री ब्रह्मा को विविध प्रकार की उत्पत्ति को जानकर इस परम साहस से शून्य प्रश्न का उत्तर हरि ने दिया था ।।७५।। इससे यह तत्त्व का सर्वोत्कृष्ट स्थान गुह्य भूत अन्य नही है । शिव अध्यात्मवादी ज्ञानियो का गम्य पद है ।।७६।। अपनी आत्मा को निर्गुण और सगुण रूप से दो प्रकारो में विभक्त कर के व्यवस्थित है । उसमे निष्कल निर्गुण अव्यक्त अगोचर है और सकल अर्थात् सगुण महेश्वर हैं ।।७७।। माया की विधि के ज्ञाता और अगम्य तथा गहन जिसका पहिले आदिसर्गिक लिङ्गोद्भव प्रथम बीज मम अर्थात् मेरी योनि से समायुक्त हुआ था और वह बीज काल के पर्यय से अपार योनि मे हिरण्मय अण्ड होकर उत्पन्न हुआ था । एक सहस्र वर्ष पर्यन्त वह अण्ड जल मे ही प्रतिष्ठित रहा था । अन्त में जब एक सहस्र वर्ष समाप्त हो गये तो वायु के द्वारा उसके दो भाग कर दिए गये थे ।।७८।।७९।।८०।।

कपालमेकं द्यौर्जज्ञे कपालमपरं क्षितिः ।
उल्बं तस्य महोत्सेधो योसौ कनकपर्वतः ।।८१।।
ततश्च प्रतिसंख्यात्मा देवदेवो वरः प्रभुः ।
हिरण्यगर्भो भगवांस्त्वभिजज्ञे चतुर्मुखः ।।८२।।
आताराऽर्केन्दुनक्षत्रं शून्यं लोकमवेक्ष्य च ।
कोहमित्यपि च ध्याते कुमारास्तेऽभवंस्तदा ।।८३।।
प्रियदर्शनास्तु यतयो यतीनां पूर्वजा स्तव ।
भूयो वर्षसहस्रान्ते तत एवात्मजास्तव ।।८४।।
भुवनानलसंकाशाः पद्मपत्रायतेक्षणाः ।
श्रीमान्सनत्कुमारश्च ऋभुश्चवोर्ध्वरेतसौ ।।८५।।
सनकः सनातनश्चैव तथैव च सनंदनः ।
उत्पन्नाः समकाल ते बुद्ध्यातीन्द्रियदर्शनाः ।।८६।।
उत्पन्नाः प्रतिभात्मानो जगतां स्थितिहेतवः ।
नारप्स्यंते च कर्माणि तापत्रयविवर्जिताः ।।८७।।

उस अण्ड का एक ऊपर का जो भाग था उसके पाल से तो द्यौ उत्पन्न हुआ और उसके नीचे की ओर का जो कपाल का भाग था उससे भूमि की उत्पत्ति हुई थी। उस अपर कपाल का महान् उत्सेध वाला गर्भावरण था वह कनक पर्वत मेरु है ॥८१॥ उस भिन्न हुए अण्ड से उत्पद्यमान शरीर वाले देवो के देव हिरण्यगर्भ चतुर्मुख श्रेष्ठ प्रभु आप समुत्पन्न हुए थे ॥८२॥ जब आपने तारा, सूर्य, चन्द्र और नक्षत्र वाला शून्य लोक को देखा था और मैं कौन हू, ऐसा ध्यान किया था तो फिर एक सहस्र वर्षों के अन्त मे तुम्हारे प्रिय दर्शन वाले, यत्नशील और यतियो के पूर्वज कुमार अवस्था से समन्वित आपके ही पुत्र उत्पन्न हुये थे ॥८३॥८४॥ वे सब एक ही काल मे उत्पन्न हुये थे और भुवन के अनल के समान तथा पद्म पत्र के सदृश दीर्घ नेत्रो वाले थे। श्री मान् सनत्कुमार और ऋभु ये दोनो ऊर्ध्व रेता थे। सनक, सनातन और सनन्दन बुद्धि से अतीन्द्रिय दर्शन वाले थे। ये सब ज्ञान, विशिष्ट और जगतों की स्थिति के हेतु स्वरूप तथा तीनो प्रकार के तापो से रहित थे ये कोई भी कर्मों का आरम्भ नही करेंगे ॥८५॥८६॥ ॥८७॥

अल्पसौख्य बहुक्लेश जराशोकसमन्वितम् ।
जीवन मरण चैव सभवश्च पुन: पुन. ॥८८॥
अल्पभूत सुख स्वर्गे दु खानि नरके तथा ।
विदित्वा चागम सर्वमवश्य भवितव्यताम् ॥८९॥
ऋभु सनत्कुमार च दृष्ट्वा तव वशे स्थितौ ।
त्रयस्तु त्रीन् गुणान् हित्वा चात्मजा. सनकादय: ॥९०॥
वैवर्तेन तु ज्ञानेन प्रवृत्तास्ते महौजस ।
ततस्तेषु प्रवृत्तेषु सनकादिषु वै त्रिषु ॥९१॥
भविष्यसि विमूढस्त्व मायया शङ्करस्य तु ।
एव कल्पे तु गौ वृत्ते सज्ञा नश्यति तेऽनघ ॥९२॥

कल्पे शेषाणि भूतानि सूक्ष्माणि पार्थिवानि च ।
सर्वेषां ह्यैश्वरी माया जागृतिः समुदाहृता ॥९३॥
यथैश्च पर्वतो मेरुर्देवलोको ह्युदाहृतः ।
तस्य चेदं हि माहात्म्यं विद्धि देववरस्य ह ॥९४॥

जीवन, मरण और बार-बार जन्म ग्रहण करना इसमे सुख तो बहुत कम हैं और क्लेश अधिक है तथा जरा और शोक से भी समन्वित हैं। स्वर्ग में भी अत्यन्त अल्प सुख होता है तथा नरक से दुःख ही भरे हुए हैं। इस समस्त आगम का ज्ञान प्राप्त करके और अवश्य होने वाली सम्पूर्ण भवितव्यता को जान लिया था। ऋभु और सनत्कुमार को आप के वश में स्थित देखकर सनकादि जो अन्य तीन आपके आत्मज थे वे तीनो गुणो का त्याग करके वे महान् ओज वाले अध्यात्म ज्ञान के द्वारा प्रवृत्त हो गए थे। इसके अनन्तर उन तीनो के सनकादिकों के अध्यात्म ज्ञान मे प्रवृत्त हो जाने पर आप भगवान् शङ्कर की माया से विमूढ़ हो जायेंगे। हे अनघ ! इस प्रकार से एक कल्प के व्यतीत हो जाने पर आपकी सज्ञा नष्ट होती है ॥८८॥८९॥९०॥९१॥९२॥ कल्प मे भी शेष सूक्ष्म भूत और पार्थिव हैं उन सबकी जागृति ही ऐश्वरी माया कही गई है ॥९३॥ जो यह मेरु पर्वत देवो के निवास का लोक कहा गया है अब आप देवो मे श्रेष्ठ उसके माहात्म्य का ज्ञान प्राप्त करें ॥९४॥

ज्ञात्वा चेश्वरसद्भावं ज्ञात्वा मामम्बुजेक्षणम् ।
महादेवं महाभूतं भूतानां वरदं प्रभुम् ॥९५॥
प्रणवेनाथ साम्ना तु नमस्कृत्य जगद्गुरुम् ।
त्वां च मा चैव संक्रुद्धो निःश्वसान्निदं हेदयम् ॥९६॥
एवं ज्ञात्वा महायोगमभ्युत्तिष्ठन्महाबलम् ।
अहं त्वामग्रतः कृत्वा स्तोष्याम्यनलसप्रभम् ॥९७॥

ईश्वर के सद्भाव का ज्ञान प्राप्त करके और अम्बुज के समान नेत्र वाले मुझको जानकर तथा समस्त प्राणियों को वर प्रदान करने

वाले महाभूत महादेव प्रभु का ज्ञान प्राप्त कर इन जगद्गुरु का प्रणव के तथा सामवेद के द्वारा नमस्कार करो अन्यथा यह संक्रुद्ध होकर आपको और मुझको दोनों को अपनी विश्वास की अग्नि से निर्दग्ध कर देंगे। ॥६५॥६६॥ इस प्रकार से उनके महान् बल और महान् योग को समझ कर आप उठकर खड़े हो जाइये। मैं आपको अपने आगे करके उस अग्नि के समान प्रभा वाले का स्तवन करूँगा ॥६७॥

रुद्रोत्पत्ति वर्णन

अत्यंतावनतौ दृष्ट्वा मधुपिंगायतेक्षणः ।
प्रहृष्टवदनोऽत्यर्थमभवत्तस्य कीर्तनात् ॥१॥
उमापतिर्विरूपाक्षो दक्षयज्ञविनाशन. ।
पिनाकी खंडपरशुः सुप्रीतस्तु त्रिलोचनः ॥२॥
तत· स भगवान्देव श्रु त्वा वागमृतं तयो. ।
जानन्नपि महादेव क्रीडापूर्वमथाब्रवीत् ॥३॥
को भवतो महात्मानौ परस्परहितैषिणौ ।
समेतावब्जाभाक्षावस्मिन्घोरे महाप्लवे ॥४॥
तावूचतुर्महात्मानौ सन्निरीक्ष्य परस्परम् ।
भगवन् किं तु यत्तोऽद्य न विज्ञातं त्वया विभो ॥५॥
विभो रुद्र महामाय इच्छया वा कृतौ त्वया ।
तयोस्तद्वचनं श्रु त्वा अभिनंद्याभिमान्य च ॥६॥
उवाच भगवान्देवो मधुरं श्लक्ष्णया गिरा ।
भो भो हिरण्य गर्भ त्वा त्वा च कृष्ण ब्रवीम्यहम् ॥७॥
प्रीतोऽहमनया भक्त्या शाश्वताक्षरयुक्तया ।
भवतो रहदयस्यास्य मम रहद्यतराबुभौ ॥८॥

सूतजी ने कहा—मधु के समान पिङ्ग तथा आयत नेत्रों वाले भगवान् महेश्वर ने ब्रह्मा और विष्णु दोनों को अत्यन्त विनम्र देखा था और उनके सत्य स्तवन करने से वह महेश्वर अत्यन्त प्रसन्न हो गए थे। ॥१॥ उमा के स्वामी विरूपाक्ष, दक्ष प्रजापति के यज्ञ का विध्वंश करने वाले पिनाक धनुष को धारण करने वाले, खण्ड परशु और तीन नेत्रों को धारण करने वाले अत्यन्त प्रसन्न हो गए थे ॥२॥ इसके अनन्तर भगवान् महेश्वर देव ने उन दोनों ब्रह्मा और विष्णु की अमृतमयी वाणी का श्रवण किया था और महादेव सब कुछ का ज्ञान रखते हुए भी इसके अनन्तर क्रीडा पूर्वक बोले ॥३॥ आप दोनों परस्पर में एक दूसरे के हित के चाहने वाले कौन महात्मा हैं ? इस घोर महाप्लव में कमल के सदृश आभा से युक्त नेत्रों वाले यहाँ कैसे एकत्रित हुए हो ? ॥४॥ महान् आत्मा वाले वे दोनों आपस में एक दूसरे को देखकर बोले—हे विभो ! हे भगवन् ! क्या आज आपने यह सब नहीं जान लिया है ? हे विभो ! हे रुद्र ! हे महामाया वाले ! हम दोनों को आपने इच्छा से बनाया है। उन दोनों के इस वचन का श्रवण कर अभिनन्दन किया और इसको स्वीकार करके भगवान् महादेव मधुर एवं परम श्लक्ष्ण वाणी से बोले—हे हिरण्यगर्भ ! तुमको और हे कृष्ण ! तुमको मैं कहता हूँ कि अक्षर से युक्त और निरन्तर होने वाली भक्ति से मैं आप दोनों पर बहुत प्रसन्न हुआ हूँ। आप दोनों ही मेरे इस हृदय में अत्यधिक प्रिय हो गये हो ॥५॥ ॥६॥७॥८॥

युवाभ्यां किं ददाम्यद्य वराणां वरमीप्सितम् ।
अथोवाच महाभागो विष्णुर्भवमिदं वचः ॥९॥
सर्वं मम कृतं देव परितुष्टोऽसि मे यदि ।
त्वयि मे सुप्रतिष्ठा तु भक्तिर्भवतु शंकर ॥१०॥
एवमुक्तस्तु विज्ञाय सभावयत केशवम् ।
प्रददौ च महादेवो भक्तिं निजपदाम्बुजे ॥११॥

भवान्सर्वस्य लोकस्य कर्ता त्वमधिदैवतम् ।
तदेवं स्वस्ति ते वत्स गमिष्याम्यंबुजेक्षण ॥१२॥
एवमुक्त्वा तु भगवान् ब्रह्माणं चापि शंकरः ।
अनुगृह्याऽस्पृशद्देवो ब्रह्माणं परमेश्वरः ॥१३॥
कराभ्यां सुशुभाभ्या च प्राह हृष्टतरः स्वयम् ।
मत्समस्त्वं न सदेहो वत्स भक्तश्च मे भवान् ॥१४॥
स्वस्त्यस्तु ते गमिष्यामि सज्ञा भवतु सुव्रत ।
एवमुक्त्वा तु भगवास्ततोन्तर्धानमीश्वरः ॥१५॥

मैं अब आप दोनो को वरदानो मे परम अभीष्ट क्या वरदान दूं ? इस महादेव के कथन के अनन्तर महाभाग विष्णु महादेव से यह वचन बोले—हे देव ! यदि आप मेरे इस सबके किए जाने पर परम प्रसन्न हैं तो हे शङ्कर ! मैं यही चाहता हू कि आपके अन्दर मेरी सुप्रतिष्ठित भक्ति हो जावे । इस प्रकार से कहे गये महादेव ने विशेष रूप से ज्ञान प्राप्त कर केशव को सम्भावपित किया और अपने चरण कमल मे भक्ति प्रदान की थी । ६॥१०॥११॥ आप समस्त लोक के कर्त्ता हैं और आप अधिदैवत हैं । हे वत्स ! हे अम्बुजेक्षण ! मैं आपके कल्याण के लिये ही गमन करूँगा । विष्णु से इस प्रकार से कहकर फिर भगवान् शङ्कर ने ब्रह्मा पर भी अनुग्रहण किया था और परमेश्वर देव ने ब्रह्मा का स्पर्श किया था । दोनो हाथो से ब्रह्मा के शरीर का स्पर्श परम हर्षित होते हुए स्वय बोले—हे ब्रह्मन् ! आप मेरे ही समान हैं—इसमे तनिक भी सदेह नही है और आप मेरे परम भक्त हैं ॥१२॥१३॥१४॥ हे सुव्रत ! आपका कल्याण होवे और आपको यह भी वरदान मैं देता हूँ कि आपके हृदय मे यथार्थ का ज्ञान हो जावे । अब मैं जाता हू । इस प्रकार से कहकर भगवान् ईश्वर इसके पश्चात् अन्तर्हित हो गये थे । ॥१५॥

गतवान् गणपो देवः सर्वदेवनमस्कृतः ।
अवाप्य संज्ञा गोविंदात् पद्मयोनिः पितामहः ॥१६॥
प्रजाः स्रष्टुमनाश्चक्रे तप उग्रं पितामहः ।
तस्यैव तप्यमानस्य न किंचित्समवर्तत ॥१७॥
ततो दीर्घेण कालेन दुःखात्क्रोधो ह्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिंदवः ॥१८॥
ततस्तेभ्योऽश्रुबिंदुभ्यो वातपित्तकफात्मकाः ।
महाभागा महासत्त्वाः स्वस्तिकैरप्यलङ्कृता ॥१९॥
प्रकीर्णकेशाः सर्पास्ते प्रादुर्भूता महाविषाः ।
सर्पास्तानग्रजान्दृष्ट्वा ब्रह्मात्मानमनिंदयत् ॥२०॥
अहो धिक् तपसो मह्यं फलमीदृशकं यदि ।
लोकवैनाशिकी जज्ञे आदावेव प्रजा मम ॥२१॥

समस्त गणो के पति और सम्पूर्ण देवो के द्वारा वन्द्यमान देव चले गये थे । पद्म योनि पितामह ने गोविन्द से यथार्थ ज्ञान प्राप्त करके प्रजाओ के सृजन करने के मन वाले पितामह ने उग्र तपस्या की थी । उसके इस प्रकार से तप्यमान होने पर भी कुछ भी परिणाम नही आया ॥१६॥१७॥ इसके अनन्तर जब बहुत लम्बा समय तप करते हुए हो गया तो पितामह को बडा दु ख हुआ था और उस दु ख से क्रोध उत्पन्न हो गया था । उस समय क्रोध में आविष्ट हुये ब्रह्मा के नेत्रो से अश्रुओ की बूँदें गिरने लगी थी ॥१८॥ इसके पश्चात् उन आँसुओं की बूँदो से वात, पित्त और कफ के स्वरूप वाले, महाभाग, स्वस्तिको मे अलङ्कृत, महा-सत्त्व उत्पन्न हो गये थे और वे प्रकीर्ण केशो वाले महा विषधारी सर्प प्रादुर्भूत हो गये थे । उन अग्रजा स्वरूप सर्पों को देखकर ब्रह्मा ने अपने आपकी निन्दा की थी ॥१९॥२०॥ ब्रह्मा ने कहा— अहो ! मेरे इस तप को धिक्कार है जिसका यह ऐसा फल हुआ है । आदि मे ही लोको के विनाश करने वाली यह ऐसी मेरी प्रजा उत्पन्न हुई है ॥२१॥

तस्य तीव्राभवन्मूर्च्छा क्रोधामर्षसमुद्भवा ।
मूर्च्छाभिपरितापेन जहौ प्राणान्प्रजापतिः ॥२२॥
तस्याप्रतिमवीर्यस्य देहात्कारुण्यपूर्वकम् ।
अथैकादश ते रुद्रा रुदतोऽभ्यक्रमंस्तथा ॥२३॥
रोदनात्खलु रुद्रत्वं तेषु वै समजायत ।
ये रुद्रास्ते खलु प्राणा ये प्राणास्ते तदात्मकाः ॥२४॥
प्राणाः प्राणवतां ज्ञेयाः सर्वभूतेष्ववस्थिताः ।
अत्युग्रस्य महत्त्वस्य साधुराचरितस्य च ॥२५॥
प्राणास्तस्य ददौ भूयस्त्रिशूली नीललोहितः ।
लब्ध्वासून् भगवान्ब्रह्मा देवदेवमुमापतिम् ॥२६॥
प्रणम्य संस्थितोऽपश्यद्गायत्र्या विश्वमीश्वरम् ।
सर्वलोकमयं देवं दृष्ट्वा स्तुत्वा पितामहः ॥२७॥
ततो विस्मयमापन्नः प्रणिपत्य मुहुर्मुहुः ।
उवाच वचनं शर्वं सद्यादित्वं कथं विभो ॥२८॥ –

उस पितामह को अत्यन्त तीव्र मूर्छा हो गई थी जो कि क्रोध और अमर्ष के कारण उत्पन्न हुई थी। उस मूर्छा के कारण जो ब्रह्मा को अभि-परिताप हुआ उससे प्रजापति ने प्राणों का त्याग कर दिया था ॥२२॥ अप्रतिम रूप वाले उसके देह से करुणा के साथ रुदन करते हुये एकादश रुद्र निकल पड़े थे ॥२३॥ रोदन करने से ही उनमें रुद्रत्व उत्पन्न हो गया था। जो रुद्र थे वे ही निश्चय उसके प्राण थे और जो प्राण थे वे तत्स्वरूप वाले थे ॥२४॥ प्राण वालों के प्राण जानने के योग्य होते हैं जो कि समस्त प्राणियों में अवस्थित होते हैं। यह अति तीव्र सदाचार और महत्व के साधक हैं ॥२५॥ नील लोहित त्रिशूली ने फिर उसके प्राणों को दे दिया था। भगवान् ब्रह्मा ने प्राणों को प्राप्त करके देवों के देव उमा के पति को प्रणाम किया था और संस्थित होकर गायत्री के द्वारा विश्व रूप वाले ईश्वर को देखा था।

सर्व लोकमय देव का दर्शन करके पितामह ने उनका स्तवन किया।।।२६।।२७।। इसके पश्चात् ब्रह्मा को अत्यन्त विस्मय हुआ। उसने बार-म्बार प्रणिपात करके भगवान् शम्भु यह वचन कहा कि हे विभो! आपका सद्यादि रूपता कैसे हो गई है अर्थात् तुरन्त ही प्रादुर्भाव कैसे हो गया है? ।।२८।।

गायत्री-महिमा

तस्य तद्वचनं श्रुत्वा ब्रह्मणो भगवान् भवः ।
ब्रह्मरूपी प्रबोधार्थं ब्रह्माणं प्राह सस्मितम् ।।१।।
श्वेतकल्पो यदा ह्यासीदहमेव तदाभवम् ।
श्वेतोष्णीषः श्वेतमाल्यः श्वेतांबरधरः सितः ।।२।।
श्वेतास्थिः श्वेतरोमा च श्वेतासृक् श्वेतलोहितः ।
तेन नाम्ना च विख्यातः श्वेतकल्पस्तदा ह्यसौ ।।३।।
मत्प्रसूता च देवेशी श्वेतांगा श्वेतलोहिता ।
श्वेतवर्णा तदा ह्यासीद्गायत्री ब्रह्मसंज्ञिता ।।४।।
तस्मादहं च देवेश त्वया गुह्येन वै पुनः ।
विज्ञातः स्वेन तपसा सद्योजातत्वमागतः ।।५।।
सद्योजातेति ब्रह्मैतद्गुह्यं चैतत्प्रकीर्तितम् ।
तस्माद्गुह्यत्वमापन्नं ये वेत्स्यंति द्विजातयः ।।६।।
मत्समीप गमिष्यंति पुनरावृत्तिदुर्लभम् ।
यदा चैव पुनस्त्वासील्लोहितो नाम नामतः ।।७।।

श्री सूतजी ने कहा—उस ब्रह्मा के उस वचन को सुनकर भगवान् भव जो कि ब्रह्म के रूप वाले हैं, प्रबोध कराने के लिए मन्द मुस्कान के साथ ब्रह्मा से बोले ।।१।। जिस समय श्वेत कल्प था उस

समय मे मैं ही हुआ था। मेरा उस समय श्वेत उष्णीष था, श्वेत ही माल्य था, श्वेत अम्बरों के धारण करने वाला, श्वेत-श्वेत अस्थियों से युक्त, श्वेत रोमों से सम्पन्न, श्वेत रुधिर वाला और मैं श्वेत लोहित था। अतएव उसी नाम से उसी समय मे यह श्वेत कल्प विख्यात हुआ था ॥२॥३॥ मुझसे समुत्पन्न देवेशी श्वेत अङ्गों वाली, श्वेत लोहिता तथा श्वेत वर्ण से युक्त उस समय मे गायत्री ब्रह्म संज्ञा वाली हुई थी ॥४॥ हे देवेश ! उससे गुह्य तुमने मुझे पुनः जान लिया है और अपने तप के प्रभाव से सद्यं जातत्व को प्राप्त हो गया है ॥५॥ सद्योजात यह ब्रह्म है जो कि अत्यन्त गुह्य कहा गया है। इससे गुह्यत्व को प्राप्त होने वाले उसको जो द्विजातिगण जान लेंगे वे मेरे ही समीप मे गमन करेंगे और फिर उनकी पुनरावृत्ति दुर्लभ है अर्थात् फिर इस संसार मे जन्म ग्रहण नहीं करेंगे। जिस समय यह पुन हुआ था जिसका लोहित नाम था वह मेरे किए हुये वर्ण से लोहित नामक कल्प कहा गया है ॥६॥७॥

मत्कृतेन च वर्णेन कल्पो वै लोहितः स्मृतः।
तदा लोहितमांसास्थिलोहितक्षीरसंभवा ॥८॥
लोहिताक्षी स्तनवती,गायत्री गौः प्रकीर्तिता।
ततोऽस्या लोहितत्वेन वर्णस्य च विपर्ययात् ॥९॥
वामत्वाच्चैव देवस्य वामदेवत्वमागतः ।
तत्रापि च महासत्त्वस्त्वयाहं नियतात्मना ॥१०॥
विज्ञातः स्वेन योगेन तस्मिन्वर्णान्तरे स्थितः।
ततश्च वामदेवेति ख्यातिं यातोऽस्मि भूतले ॥११॥
ये चापि वामदेवं त्वां ज्ञास्यन्तीह द्विजातयः।
रुद्रलोकं गमिष्यन्ति पुनरावृत्तिदुर्लभम् ॥१२॥
यदाहं पुनरेवेह पीतवर्णो युगक्रमात् ।
मत्कृतेन च नाम्ना वै पीतकल्पोऽभवत्तदा ॥१३॥

मत्प्रसूता च देवेशी पीतांगी पीतलोहिता।
पीतवर्णा तदा ह्यासीद्गायत्री ब्रह्मसंज्ञिता ॥१४॥

उस समय मांस और अस्थि आदि सब लोहित थे और लोहित क्षीर से सम्भूत, लोहित नेत्रों वाली, स्तनों वाली गायत्री गौ कही गई थी। इसके अनन्तर इसके लोहितत्व से और वर्ण के विपर्यय होने से इसका इस प्रकार का नाम हुआ था ॥८॥९॥ देव के वामत्व होने से यह वाम देवत्व को प्राप्त हुआ था। वहाँ पर भी हे महासत्त्व! नियत आत्मा वाले आपने उस भिन्न वर्ण में स्थित मुझे अपने योग के बल से विज्ञात कर लिया था और इस कारण से भूतल में वामदेव—इस नाम की ख्याति को प्राप्त हुआ था ॥१०॥११॥ जो द्विजाति गण यहाँ वाम देवत्व के स्वरूप का ज्ञान प्राप्त कर लेंगे वे सीधे रुद्र लोक को चले जायेंगे और फिर उनका दुबारा जन्म नहीं होगा ॥१२॥ जिस समय में पुनः यहा पर युग के क्रम से पीत वर्ण वाला हुआ था तब मेरे किए हुए नाम के द्वारा पीत वस्त्र हुआ था ॥१३॥ मुझसे प्रसूत होने वाली देवेशी, पीताङ्गी, पीत लोहिता, पीत वर्ण वाली उस समय में ब्रह्म संज्ञिता गायत्री हुई थी ॥१४॥

तत्रापि च महासत्त्व योगयुक्तेन चेतसा।
यस्मादहं तेविज्ञातो योगतत्परमानसैः ॥१५॥
तत्र तत्पुरुषत्वेन विज्ञातोऽहं त्वया पुनः।
तस्मात्तत्पुरुषत्वं वै ममैतत्कनकांडज ॥१६॥
ये मां रुद्रं च रुद्राणीं गायत्रीं वेदमातरम्।
वेत्स्यति तपसा युक्ता विमला ब्रह्मसंगताः ॥१७॥
रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभम्।
यदाहं पुनरेवासं कृष्णवर्णो भयानकः ॥१८॥
मत्कृतेन च वर्णेन संकल्पः कृष्ण उच्यते।
तत्राहं कालसंकाशः यातो लोकप्रकालकः ॥१९॥

विज्ञातोऽहं त्वया ब्रह्मन्घोरो घोरपराक्रमः।
मत्प्रसूता च गायत्री कृष्णांगी कृष्णलोहिता ॥२०॥
कृष्णरूपा च देवेश तदासीद्ब्रह्मसंज्ञिता ।
तस्माद्धोरत्वमापन्नं ये मां वेत्स्यंति भूतले ॥२१॥

हे महासत्व ! उस समय मे वहाँ पर भी योग युक्त चित्त के द्वारा योग मे तत्पर मानस वाले उनके द्वारा मैं पहिचान लिया गया था ॥१५॥ वहाँ पर आपने फिर मुझे तत्पुरुष रूप से विज्ञात किया था । हे कनकाण्डज ! मेरा यह तत्पुरुषत्व रूप है ॥१६॥ जो लोग तप से युक्त, विमल और ब्रह्म सज्ञक हैं मुझ रुद्र को और वेदो की मात रुद्राणी गायत्री को जान लेंगे अर्थात् ठीक ज्ञान प्राप्त कर लेंगे वे सब रुद्र लोक मे गमन करेंगे और उनकी इस संसार मे फिर दुबारा आवृत्ति दुर्लभ होगी। जिस समय मैं भयानक कृष्ण वर्ण वाला था तब मेरे द्वारा किये हुए वर्ण से वह कल्प कृष्ण कहा जाता है। वहाँ पर मैं काल के समान और लोकों को प्रकाशित करने वाला काल ही था ॥१७।१८॥ १९॥ हे ब्रह्मन् ! उस समय में तुमने मुझे घोर और घोर पराक्रम वाला विज्ञात किया था। मुझसे प्रसव ग्रहण करने वाली गायत्री कृष्णाङ्गी, कृष्ण लोहिता और हे देवेश ! ब्रह्म संज्ञिता कृष्ण रूपा उस समय मे थी। इससे घोरत्व को प्राप्त मुझको जो लोग भूतल मे जान जायेंगे उनको मैं अघोर और शान्त अव्यय हो जाऊंगा ॥२०॥२१॥

तेषामघोरः शांतश्च भविष्यादेम्हमव्ययः ।
पुनश्च विश्वरूपत्वं यदा ब्रह्मन्ममाभवत् । २२॥
तदाप्यहं त्वया ज्ञातः परमेण समाधिना ।
विश्वरूपा च संवृत्ता गायत्री लोकधारिणी ॥२३॥
तस्मिन्विश्वत्वमापन्नं ये मां वेत्स्यन्ति भूतले ।
तेषां शिवश्च सौम्यश्च भविष्यामि सदैव हि ॥२४॥

यस्माच्च विश्वरूपो वै कल्पोऽयं समुदाहृतः ।
विश्वरूपा तथा चेयं सावित्री समुदाहृता ॥२५॥
सर्वरूपा तथा चेमे संवृत्ता मम पुत्रकाः ।
चत्वारस्ते मया ख्याताः पुत्रा वै लोकसंमताः ॥२६॥
यस्माच्च सर्ववर्णत्वं प्रजाना च भविष्यति ।
सर्वभक्षा च मेध्या च वर्णतश्च भविष्यति ॥२७॥
मोक्षो धर्मस्तथार्थश्च कामश्चेति चतुष्टयम् ।
यस्माद्वेदाश्च वेद्यं च चतुर्धा व भविष्यति ॥२८॥

इसके पश्चात् फिर जिस समय मे मैं विश्व रूपत्व को हे ब्रह्मन् प्राप्त हुआ अर्थात् मेरी विश्व रूपता हो गई थी तब भी परमोत्कृष्ट समाधि के द्वारा तुमने मुझे जान लिया था और यह गायत्री लोकधारिणी विश्वरूपा हो गई थी ॥२२॥२३॥ उसमे भूतल में जो लोग मुझे विश्वरूपत्व को प्राप्त होने वाला जान लेंगे उनके लिए मैं शिवत्व और परम सौम्यत्व के स्वरूप वाला सदा ही हो जाऊँगा ॥२४॥ मैंने यह विश्व रूप कल्प समुदाहृत कर दिया है और इसी प्रकार से यह सावित्री विश्वरूपा बतादी है ॥२५॥ जिस प्रकार से समस्त रूप वाली गायत्री है वैसे ही ये सब मेरे पुत्र भी समुत्पन्न हुए हैं। मेरे द्वारा वे चार लोक सम्मत पुत्र ख्यात हैं ॥२६॥ जिससे प्रजाओं का सब वर्णत्व होगा। यह वर्ण से और चत्वार से अर्थ से सर्वभक्ष और यज्ञयोग्या होगी। यह गायत्री होगी इसीलिये प्रजाओं की सर्ववर्णता होगी ॥२७॥ धर्म अर्थ, काम और मोक्ष इनका चतुष्टय होता है जिससे वेद और वेद्य अर्थात् पुरुषार्थ स्वरूप चार प्रकार के होंगे। ॥२८॥

भूतग्रामाश्च चत्वार आश्रमाश्च तथैव च ।
धर्मस्य पादाश्चत्वारश्चत्वारो ममः पुत्रकाः ॥२९॥

तस्माच्चतुर्युगावस्थं जगद्वै सचराचरम् ।
चतुर्धावस्थितश्चैव चतुष्पादो भविष्यति ॥३०॥
भूर्लोकोऽथ भुवर्लोकः स्वर्लोकश्च महस्तथा ।
जनस्तपश्च सत्यं च विष्णुलोकस्ततः परम् ॥३१॥
अष्टाक्षरस्थितो लोकः स्थानेस्थाने तदक्षरम् ।
भूर्भुवः स्वर्महश्चैव पादाश्चत्वार एव च ॥३२॥
भूर्लोकः प्रथमः पादो भुवर्लोकस्ततः परम् ।
स्वर्लोको गो तृतीयश्च चतुर्थस्तु महस्तथा ॥३३॥
पंच मस्तु जनस्तत्र षष्ठश्च तप उच्यते ।
सत्यं तु सप्तमो लोको ह्यपुनर्भवगामिनाम् ॥३४॥
विष्णुल'कः स्मृत स्थान पुनरावृत्तिदुर्लभम् ।
स्कांदमोम तथा स्थानं सर्वसिद्धिसमन्वितम् ॥३५॥

भूतो अर्थात् प्राणियो के ग्राम अर्थात् समूह भी चार प्रकार के हैं जिनके नाम जरायुज, अण्डज, स्वेदज और उद्भिज्ज हैं उसी प्रकार से ब्रह्मचर्य, गार्हस्थ्य, वानप्रस्थ और सन्यास ये आश्रम भी चार प्रकार के होते हैं। हे मेरे पुत्रो! धर्म के दया, दान, तप और सत्य ये चार पाद होते हैं ॥२६॥ इसीलिये यह जगत् समस्त चराचर चार युगो की अवस्था वाला है। चार प्रकार से अवस्थित यह चार पादो वाला होगा ॥३०॥ भूलोक, भुवर्लोक, स्वर्लोक, महार्लोक, जनलोक, तपलोक, सत्यलोक और इस सबसे परे विष्णु लोक है ॥३१॥ अष्टाक्षर रूपलोक है और स्थान-स्थान मे वह अक्षर है। भूः, भुवः स्व. और महः ये चार ही पाद होते हैं ॥३२॥ भूर्लोक प्रथम पाद है, इसके पश्चात् भुवर्लोक द्वितीय पाद है, फिर स्वर्लोक तृतीय पाद है और उसी प्रकार महर्लोक चतुर्थ पाद होता है ॥३३॥ पञ्चम जनलोक, षष्ठ तपलोक कहा जाता है। सत्य सप्तम लोक है जो कि अपुनर्गामियो के ही लिये हैं अर्थात् इनमें पहुँचकर फिर यहाँ पुनरागमन नही होता है ॥३४॥ विष्णु लोक

तो एक ऐसा स्थान है जहाँ से पुनरावृत्ति का अत्यन्त दुर्लभ ही कही गई है । स्का द तथा ग्रौम उस प्रकार के स्थान हैं जो कि समस्त प्रकार की सिद्धियों से समन्वित होते हैं ॥३५॥

रुद्रलोक स्मृतस्तस्मात्पद तद्योगिना शुभम् ।
निर्ममा निरहङ्कारा कामक्रोध विवर्जिता ॥३६॥
द्रक्ष्यति तद्द्विजा युक्ता ध्यानतत्परमानसा ।
यस्माच्चतुष्पदा ह्येषा त्वया दृष्टा सरस्वती ॥३७॥
पादात विष्णु लोक वै कौमार शातमुत्तमम् ।
औम माहेश्वर चैव तस्माद्दृष्टा चतुष्पदा ॥३८॥
तस्मात्तु पशव सर्वे भविष्यति चतुष्पदा ।
ततश्चैषा भविष्यति चत्वारस्ते पयोधरा ॥३९॥
सोमश्च मन्त्रसयुक्तो यस्मान्मम मुखाच्च्युत ।
जीव प्राणभृता ब्रह्मन्पुन पोतस्तना स्मृता ॥४०॥
तस्मात्सोममय चैव अमृत जीवसज्ञितम् ।
चतुष्पादा भविष्यति श्वेतत्व चास्य तेन तत् ॥४१॥
यस्माच्चैव क्रिया भूत्वा द्विपदा च महेश्वरी ।
दृष्टा पुनस्तथैवैषा सावित्री लोकभाविनी ॥४२॥

उससे फिर रुद्र लोक कहा गया है, जो कि योगियों के लिए परम शुभ स्थान है । जो ममता से रहित, महङ्कार से शून्य और काम तथा क्रोध से वर्जित एव ध्यान मे परायण मन वाले युक्त द्विज हैं वे ही उस स्थान का दर्शन करेंगे । जिस कारण से तुमने यह सरस्वती चतुष्पाद वाली देखी है ॥३६॥३७॥ विष्णु लोक पादान्त है, कुमार स्कन्द का कौमार परम शान्त एव उत्तम है उमा का लोक औम और महेश्वर का माहेश्वर अर्थात् शैव लोक है इससे चतुष्पदा यह देखी गई है ॥३८॥ इससे समस्त पशुगण चतुष्पद अर्थात् चार पैर वाले होंगे। इसी कारण से इनके चार ही पयोधर होगे । मन्त्रों के द्वारा हुत सोम मेरे मुख से

च्युत हो गया था जो कि प्राण धारियों का जीव है। हे ब्रह्मन्! फिर ये पीतस्तन कहे गये हैं ॥३६॥४०॥ इससे सोममय अमृत जीव संज्ञा वाला है। चतुष्पादा होने इसी कारण से उसे श्वेतत्व होता है। दुग्ध को श्वेतत्व और सोम रूपत्व होने से ही होता है, यह तात्पर्य है ॥४१॥ जिस कारण से क्रिया होकर महेश्वरी द्विपदा देखी है फिर उसी प्रकार से यह लोक भाविनी सावित्री है ॥४२॥

तस्माच्च द्विपदाः सर्वे द्विस्तनाश्च नराः शुभाः ।
तस्माच्चेयमजा भूत्वा सर्ववर्णा महेश्वरी ॥४३॥
या वै दृष्टा महासत्त्वा सर्वभूतधरा त्वया ।
तस्माच्च विश्वरूपत्वं प्रजाना वै भविष्यति ॥४४॥
अजश्चैव महातेजा विश्वरूपो भविष्यति ।
अमोघरेताः सर्वत्र मुखे चास्य हुताशनः ॥४५॥
तस्मात्सर्वगतो मेध्यः पशुरूपो हुताशनः ।
तपसा भावितात्मानो ये मां द्रक्ष्यंति वै द्विजाः ॥४६॥
ईशित्वे च वशित्वे च सर्वगं सर्वतः स्थितम् ।
रजस्तमोभ्यां निर्मुक्तास्त्यक्त्वा मानुष्यकं वपुः ॥४७॥
मत्समीपमुपेष्यंति पुनरावृत्तिदुर्लभम् ।
इत्येवमुक्तो भगवान्ब्रह्मा रुद्रेण वै द्विजाः ॥४८॥
प्रणम्य प्रयतो भूत्वा पुनराह पितामहः ।
य एव भगवान् विद्वान् गायत्र्या गौ महेश्वरम् ॥४९॥
विश्वात्मानं हि सर्वं त्वां गायत्र्यास्तव चेश्वर ।
तस्य देहि परं स्थानं तथास्त्विति च सोऽब्रवीत् ॥५०॥
तस्माद्विद्वान् हि विश्वत्वमस्याश्चास्य महात्मनः ।
स याति ब्रह्मसायुज्यं वचनाद्ब्रह्मणः प्रभोः ॥५१॥

और इसी कारण से समस्त मनुष्य शुभ दो पादों वाले हैं और दो स्तनों वाले होते हैं। और इसी कारण से यह अजा होकर

महेश्वरी सर्व वर्णा है ।।४३।। जो कि तुम्हारे द्वारा महान् सत्त्व वाली और समस्त भूतों को धारण करने वाली देखी गई है। इसी कारण से प्रजाओं का विश्वरूपत्व होगा ।।४४।। और महान् तेज वाला अज विश्व रूप होगा। यह सर्वत्र अमोघ रेतस वाला है और इसके मुख मे हुताशन है ।।४५।। इससे सर्वगत, मेध्य और पशु रूपी हुताशन होता है। तप के द्वारा भावित आत्मा वाले जो द्विज मुझको देखेंगे वे ईशित्व और वशित्व मे सर्वत्र गमन करने वाले और सर्वत्र स्थित रहने वाले तथा रजोगुण और तमोगुण से निर्मुक्त होते हुए इस मानुष शरीर का त्याग करके मेरे समीप मे प्राप्त होंगे और फिर इस संसार में उनका आगमन अत्यन्त दुर्लभ हो जायगा। हे द्विजगण ! इस प्रकार से रुद्र भगवान् के द्वारा ब्रह्माजी को कहा गया था ।।४६।।४७।।४८।। फिर पितामह ने प्रयत होकर महेश्वर को प्रणाम किया था और पुनः कहा— जो इस प्रकार से भगवान् गायत्री के साथ महेश्वर के विद्वान् हैं और आपको विश्वात्मा सर्व जानते हैं तो हे ईश्वर ! उनकी गायत्री का और आपका पर स्थान दीजिए। तथा वह 'तथास्तु' अर्थात् ऐसा ही होगा—यह बोला ।।४९।। ।।५०।। इससे इस गायत्री का और इस महेश्वर का विश्व रूपत्व का जो विद्वान् है वह प्रभु ब्रह्मा के वचन से ब्रह्म सायुज्य को प्राप्त होता है ।।५१।।

।। योगावतार वर्णन ।।

श्रुत्वैवमखिलं ब्रह्मा रुद्रेण परिभाषितम् ।
पुनः प्रणम्य देवेशं रुद्रमाह प्रजापतिः ।।१।।
भगवन्देवदेवेश विश्वरूपं महेश्वर ।
उमाधवव महादेव नमो लोकाभिवंदित ।।२।।

विश्वरूप महाभाग कस्मिन्काले महेश्वर ।
या इमास्ते महादेव तनवो लोकवंदिताः ॥३॥
कस्यां वा युगसंभूत्यां द्रक्ष्यंतीह द्विजातयः ।
केन वा तपसा देव ध्यानयोगेन केन वा ॥४॥
नमस्ते वै महादेव शक्यो द्रष्टुं द्विजातिभिः ।
तस्य तद्वचनं श्रुत्वा शर्वः संप्रेक्ष्य तं पुरः ॥५॥
स्मयन्प्राह महादेवो ऋग्यजुःसामसं भवः ।
तपसा नैव वृत्तेन दानधर्मफलेन च ॥६॥
न तीर्थफलयोगेन ऋतुभिर्वातदक्षिणैः ।
न वेदाध्ययनैर्वापि न वित्तेन न वेदनैः ॥७॥
न शक्यं मानवैर्द्रष्टुमृते ध्यानादहं त्विह ।
सप्तमे चैव वाराहे ततस्तस्मिन्पितामह ॥८॥
कल्पेश्वरोऽथ भगवान् सर्वलोकप्रकाशनः ।
मनुर्वैवस्वतश्चैव तव पौत्रो भविष्यति ॥९॥
तदा चतुर्युगावस्थे तस्मिन्कल्पे युगांतिके ।
अनुग्रहार्थं लोकानां ब्राह्मणानां हिताय च ॥१०॥
उत्पत्स्यामि तदा ब्रह्मन्पुनरस्मिन्युगांतिके ।
युगप्रवृत्त्या च तदा तस्मिंश्च प्रथमे युगे ॥११॥

श्री सूतजी ने कहा—इस प्रकार से ब्रह्माजी ने रुद्र के द्वारा किए हुए समस्त परिभाषित का अवधारण करके प्रजा पति ने पुनः देवेश रुद्र को प्रणाम करके कहा ॥१॥ हे भगवन् ! आप तो देवों के भी देव हैं, विश्व के रूप और महान् ईश्वर हैं । हे उमा के स्वामिन् ! हे महादेव ! आप लोकों के द्वारा अभिवन्दित हैं आपको मेरा नमस्कार है ॥२॥ हे विश्वरूप ! आप महान् भाग वाले हैं और महान् ईश्वर हैं । आपके जो ये लोकवन्दित तनु हैं वे किस समय में अथवा किस युग की सम्भूति में यहाँ द्विजाति गण देखेंगे और किस तप के द्वारा तथा

हे देव ! किस ध्यान योग के द्वारा देखेंगे, यह बताइये ॥३॥४॥ हे महादेव ! आपको मेरा नमस्कार है । आप द्विजातियों के द्वारा देखे जा सकते हैं । उसके इस वचन का श्रवण कर शम्भु ने उसको अपने आगे देखकर महादेव ने मुस्कराते हुए कहा जो कि ऋक्, यजु और सामवेद से सम्भव है । श्री भगवान ने कहा—मैं यहाँ पर तप, वृत्त, दान और धर्म का फल, तीर्थों के फल का योग, आप्त दक्षिणा वाले क्रतु समुदाय, वेदों के अध्ययन, वित्त और शास्त्रों के ज्ञान से मानवों के द्वारा देखा नहीं जा सकता हूं अर्थात् इन उक्त किसी भी एक या समस्त साधनों से मनुष्य मुझे नहीं देख सकते है केवल ध्यान से ही मैं देखा जाने के योग्य होता हूँ । हे पितामह ! इसके पश्चात् सप्तम वाराह कल्प मे समस्त लोक का प्रकाश करने वाला कल्पेश्वर भगवान् मैं और वैवस्वत मनु आपके पौत्र होंगे ॥५॥६॥७॥८॥९॥ उस समय मे चतुर्युगावस्थ उस युगान्तिक कल्प मे लोकों के ऊपर अनुग्रह करने के लिए तथा ब्राह्मणों के हित सम्पादन करने के लिए तब हे ब्रह्मन् ! युग की प्रवृत्ति से उस प्रथम युग मे मैं उत्पन्न हो जाऊँगा ॥१०॥ ॥११॥

योगात्मानो महात्मानो ब्राह्मणा वेदपारगाः ।
प्राप्य माहेश्वरं योगं विमला ह्यूर्ध्वरेतसः ॥१२॥
रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभम् ।
एते पाशुपताः सिद्धा भस्मोद्धूलितविग्रहाः ॥१३॥
लिंगार्चनरता नित्यं बाह्याभ्यंतरतः स्थिताः ।
भक्त्या मयि च योगेन ध्यान निष्ठा जितेंद्रियाः ॥१४॥
संसारबंधच्छेदार्थं ज्ञानमार्गप्रकाशकम् ।
स्वरूपज्ञानसिद्धयर्थं योगं पाशुपतं महत् ॥१५॥

उस समय मे योगात्मा और महान् आत्मा वाले वेदों के पारगामी ब्राह्मण माहेश्वर योग की प्राप्ति करके परम विमल और ऊर्ध्व

रेतस हो जायेंगे और फिर वे रुद्र लोक को प्राप्त करेंगे जहाँ पहुँचकर पुनः इस ससार मे आवृत्ति होती ही नही है। ये पाशुवत सिद्ध है जिनका सम्पूर्ण शरीर भस्म से उद्धूलित रहा करता है ॥१२॥१३॥ ये नित्य ही लिङ्ग की अर्चना मे रत रहने वाले हैं जो बाहिर और भीतर उसी अर्चन मे स्थित रहा करते हैं। भक्ति की भावना के द्वारा मुझमे योग से ध्याननिष्ठ होते हैं और इन्द्रियो को जीतकर रखने वाले हैं ॥१४॥ इस ससार के बन्धन का छेदन करने के लिए ज्ञान के मार्ग को प्रकाशित करने वाला है तथा स्वरूप के ज्ञान की सिद्धि के लिए पाशुपत योग महान् होता है ॥१५॥

योगमार्गा अनेकाश्च ज्ञानमार्गास्त्वनेकशः ।
न निवृत्तिमुपायाति विना पचाक्षरी क्वचित् ॥१६॥
यदाचरेत्तपश्चाय सर्वद्वद्वविवर्जितम् ।
तदा स मुक्तो मतव्यः पक्वं फलमिव स्थितः ॥१७॥
एकाह यः पुमान्सम्यक् चरेत्पाशुपतव्रतम् ।
न साख्ये पञ्चरात्रे वा न प्राप्नोति गति कदा ॥१८॥
इत्येतद्वै मया प्रोक्तमवतारेषु लक्षणम् ।
मन्वादिकृष्णपर्यंतमष्टाविशद्युगक्रमात् ॥१९॥
तत्र श्रुतिसमूहाना विभागो धर्मलक्षणः ।
भविष्यति तदा कल्पे कृष्णद्वैपायनो यदा ॥२०॥
निशम्यैवं महातेजा महादेवेन कीर्तितम् ।
रुद्रावतारं भगवान् प्रणिपत्य महेश्वरम् ॥२१॥

यो तो योग के अनेक मार्ग हैं और बहुत से ज्ञान के भी मार्ग होते हैं। किन्तु 'ओ नमो शिवाय"—इस पञ्चाक्षरी मन्त्र की जप विद्या के बिना कोई भी निवृत्ति को प्राप्त नहीं होते हैं ॥१६॥ जो समस्त द्वन्द्वो से रहित इस तप का आचरण किया करता है सब उसे मुक्त ही मान लेना चाहिए। वह तो पके हुये फल की भाँति ही स्थित

होता है ।।१७।। जो पुष्प एक दिन वाले इस पाशुपत व्रत का भली-भाँति आचरण करता है वह साख्य अथवा पञ्चरात्र मे कही गति को प्राप्त नही होता है ।।१८।। यह मैंने अवतारो मे लक्षण कह दिया है जो अष्ठा विंशत युग के क्रम से मन्वादि कृष्ण पर्यन्त है ।।१९।। उस कल्प मे जबकि कृष्ण द्वैपायन होगे श्रुतियो के समूहो का धर्मानक्षण विभाग होगा ।।२०।। सूतजी ने कहा—इस प्रकार से महान् तेज वाले प्रजापति ने महादेव के द्वारा कहे गये इस सबका श्रवण करके रुद्रावतार महेश्वर को प्रणाम किया था ।।२१।।

तुष्टाव वाग्भिरिष्टाभिः पुनः प्राह च शङ्करम् ।
सर्वे विष्णुमया देवाः सर्वे विष्णुमया गणाः ।।२२।।
न हि विष्णुसमा काचिद्गतिरन्या विधीयते ।
इत्येव सतत वेदा गायति नात्र सशयः ।।२३।।
स देवदेवो भगवास्तव लिगार्चने रतः ।
तव प्रणामपरमः कथ देवो ह्यभूतप्रभुः ।।२४।।
निशम्य वचन तस्य ब्रह्मणः परमेष्ठिन ।
प्रपिबन्निव चक्षुर्भ्या प्रीतस्तत्प्रश्नगौरवात् ।।२५।।
पूजाप्रकरण तस्मै तमालोक्याह शङ्कर ।
भवान्नारायणश्चैव शक्र साक्षात्सुरोत्तमः ।।२६।।
मुनयश्च सदा लिग संपूज्य विधिपूर्वकम् ।
स्वस्व पद विभो प्राप्तास्तस्मात्सपूजयति ते ।।२७।।
लिङ्गार्चन विना निष्ठा नास्ति तस्माज्जनार्दनः ।
आत्मनो यजते नित्य श्रद्धया भगवान्प्रभुः ।।२८।।
इत्येवमुक्त्वा ब्रह्माणमनुगृह्य महेश्वरः ।
पुनः सप्रेक्ष्य देवेश तत्रैवातरधीयत ।।२९।।
तमुद्दिश्य तदा ब्रह्मा नमस्कृत्य कृताजलि ।
स्रष्टुं त्वशेष भगवाँल्लब्धसज्ञस्तु शङ्करात् ।।३०।।

और अभीष्ट वाणियों के द्वारा महेश्वर का स्तवन किया था। इसके पश्चात् भगवान शङ्कर से कहा था—पितामह ने कहा—समस्त देवता विष्णुमय हैं और सम्पूर्ण गण भी विष्णुमय हैं। विष्णु के समान अन्य कोई भी गति का विधान नहीं है। इसी प्रकार से समस्त वेद निरन्तर गान किया करते हैं, इसमें कुछ भी संशय नहीं है ॥२२॥ ॥२३॥ वह देवों का भी देव भगवान् विष्णु भी आपके लिङ्ग की अर्चना में निरत रहा करते हैं और निरन्तर आपको प्रणाम करने वाले होते हैं तो वह प्रभु कैसे देव हैं? ॥२४॥ सूतजी ने कहा—परमेष्ठी ब्रह्मा के इस वचन को सुनकर नेत्रों से मानों पान कर रहे हैं। इस तरह से उसके इस प्रश्न के गौरव से शङ्कर बहुत प्रसन्न हुए थे ॥२५॥ उसको देखकर उसके लिये शङ्कर ने पूजा का प्रकरण कहा था। भगवान् नारायण और शक्र (इन्द्र) साक्षात् सुरोत्तम हैं ॥२६॥ मुनिगण सदा विधि पूर्वक लिङ्ग का पूजन करके हे विभो! अपने-अपने पद को प्राप्त हुए हैं इससे वे पूजा किया करते हैं ॥२७॥ लिङ्ग की अर्चना के बिना निष्ठा नहीं होती है इससे जनार्दन भगवान् प्रभु नित्य श्रद्धा की भावना से आत्मा का यजन किया करते हैं ॥२८॥ इस प्रकार से इतना यह कह कर महेश्वर ब्रह्मा पर अनुग्रह करके और पुनः देवेश भली-भाँति देखकर वहाँ पर ही अन्तर्हित हो गये थे ॥२९॥ उस समय में ब्रह्माजी ने उनका उद्देश्य करके हाथ जोड़कर प्रणाम किया था क्योंकि भगवान् शङ्कर से समस्त का सृजन करने के लिए अनुज्ञा प्राप्त करली थी ॥३०॥

शिवोक्त स्नान विधि

कथं पूज्यो महादेवो लिंगमूर्तिर्महेश्वरः ।
वक्तुमर्हसि चास्माकं रोमहर्षण सांप्रतम् ॥१॥

देव्या पृष्टो महादेवः कैलासे तां नगात्मजाम् ।
श्रंकस्थामाह देवेशो लिंगार्चनविधिं क्रमात् ॥२॥
तदा पार्श्वे स्थितो नंदी शालंकायनकात्मजः ।
श्रुत्वाखिलं पुरा प्राह ब्रह्मपुत्राय सुव्रताः ॥३॥
सनत्कुमाराय शुभं लिंगार्चनविधिं परम् ।
तस्माद्व्यासो महातेजाः श्रुतवाञ्छ्रुतिसम्मितम् ॥४॥
स्नानयोगोपचारं च यथा शैलादिनो मुखात् ।
श्रुतवान् तत्प्रवक्ष्यामि स्नानाद्यं चार्चनाविधिम् ॥५॥
अथ स्नानविधिं वक्ष्ये ब्राह्मणाना हिताय च ।
सर्वपापहरं साक्षाच्छिवेन कथितं पुरा ॥६॥
अनेन विधिना स्नात्वा सकृत्पूज्य च शङ्करम् ।
ब्रह्मकूर्चं च पीत्वा तु सर्वपापैः प्रमुच्यते ॥७॥

ऋषियो ने कहा--हे रोमहर्षण ! लिङ्ग की मूर्ति वाले महेश्वर किस प्रकार से पूजा के योग्य हुये है । अब आप हम लोगो को इसे बताने के योग्य होते हैं ॥१॥ सूतजी ने कहा—कैलास गिरि पर एक बार भवानी के द्वारा पूछे गये महादेव ने उस नगात्मजा को अपनी गोद मे स्थित करके देवेश ने लिङ्गार्चन की विधि को क्रम से कहा था ॥२॥ उस समय मे भगवान शङ्कर के समीप मे शालङ्कायन का पुत्र नन्दी स्थित था उसने इस सम्पूर्ण विधान का श्रवण करके पहिले हे सुव्रतो । ब्रह्मा के पुत्र के लिए कहा था ॥३॥ यह परम शुभ लिङ्ग के अर्चना की विधि जो सनत्कुमार से कही गई थी और उससे महान् तेज वाले व्यास ने इस श्रुति सम्मित का श्रवण किया था ।।४॥ शैलादि के मुख से जिस प्रकार से स्नान योगोपचार मैंने सुना था उसे स्नानादिक को और अर्चना की विधि को मैं बताता हूँ ॥५॥ शैलादि ने कहा—इसके अनन्तर मैं अब स्नान की विधि को बताता हूँ जो कि ब्राह्मणो के हित का सम्पादन करने के लिये ही कर रहा हूँ । यह समस्त प्रकार

के पापो का हरण करने वाला है और इसे पहले स्वय साक्षात् शिव ने कहा था ॥६॥ इस विधि विधान से स्नान करके और एक वार शङ्कर का पूजन करके तथा ब्रह्मकूर्च का पान करके मनुष्य सभी तरह के पापो से प्रमुक्त हो जाया करता है ॥७॥

त्रिविधं स्नानमाख्यातं देवदेवेन शंभुना ।
हिताय ब्राह्मणाद्यानां चतुर्मुखसुतोत्तम ॥८॥
वारुणं पुरतः कृत्वा ततश्चाग्नेयमुत्तमम् ।
मंत्रस्नान ततः कृत्वा पूजयेत्परमेश्वरम् ॥९॥
भावदुष्टोऽम्भसि स्नात्वा भस्मना च न शुद्धयति ।
भावशुद्धश्चरेच्छौचमन्यथा न समाचरेत् ॥१०॥
सरित्सरस्तडागेपु सर्वेष्वाप्रलयं नरः ।
स्नात्वापि भावदुष्टश्चेन्न शुध्यति संशयः ॥११॥
नृणा हि चित्तकमल प्रबुद्धमभवद्यदा ।
प्रसुप्तं तमसा ज्ञानभानोर्भासा तदा शुचिः ॥१२॥
मृच्छकृत्तिलपुष्पं च स्नानार्थं भसितं तथा ।
आदाय तीरे निःक्षिप्य स्नानतीर्थे कुशानि च ॥१३॥
प्रक्षाल्याचम्य पादौ च मल देहाद्विशोध्य च ।
द्रव्यैस्तु तीरदेशस्थैस्ततः स्नानं समाचरेत् ॥१४॥

देवो के भी देव भगवान् शम्भु ने तीन प्रकार का स्नान बताया है। हे चतुर्मुख के सुतो मे परम श्रेष्ठ ! यह ब्राह्मणादि के हित-सम्पादन करने के लिये ही कहा गया है ॥८॥ सर्व प्रथम वारुण अर्थात् जल का स्नान करे। इसके पश्चात् आग्नेय अर्थात् भस्म स्नान करे जो कि परम उत्तम स्नान कहा जाता है। इन दोनो स्नानो के पश्चात् मार्जन के स्वरूप वाला मन्त्र स्नान करना चाहिए। इनके अनन्तर परमेश्वर की पूजा करे ॥९॥ भावना की शुद्धि परम आवश्यक है। जो भाव से दुष्ट

हो तो जल मे स्नान करके तथा भस्म से भी स्नान कर लेने पर कभी शुद्ध नही होता है। अतएव भाव से शुद्ध होकर ही शुद्धि करनी चाहिये और अन्यथा कभी भी न करे ॥१०॥ सरित, सरोवर और तडागो मे सब मे प्रलय पर्यन्त भी मनुष्य स्नान करके भी यदि भाव दुष्ट है तो कभी शुद्ध नही होता है, यह सत्य सिद्धान्त है, इसमें तनिक भी संशय नही है ॥११॥ मनुष्यो का यह चित्त जो कमल के समान है जब प्रबुद्ध हो गया जो कि तम से प्रसुप्त हो रहा था। इसका विकास ज्ञान रूपी सूर्य की दीप्ति ही से होता है, तभी वह शुचि हो जाता है ॥१२॥ मृत्तिका, गोमय, तिल, पुष्प और भस्म स्नान के लिए तीर पर लाकर स्नान तीर्थ पर कुशाग्रो का प्रक्षेप करे ॥१३॥ पादों का प्रक्षालन करके आचमन करे और फिर देह से मल का विशोधन करना चाहिये। इसके अनन्तर तीर देश पर स्थित द्रव्यों से स्नान करना चाहिए ॥१४॥

उद्धृतासीतिमंत्रेण पुनर्देहं विशोधयेत् ।
मृदादाय ततश्चान्यद्वस्त्रं स्नात्वा ह्यनुल्बणम् ॥१५॥
गंधद्वारां दुराधर्षामिति मंत्रेण मंत्रवित् ।
कपिलागोमयेनैव खस्थेनैव तु लेपयेत् ॥१६॥
पुनः स्नात्वा परित्यज्य तद्वस्त्रं मलिनं ततः ।
शुक्लवस्त्रपरोधानो भूत्वा स्नानं समाचरेत् ॥१७॥
सर्वपापविशुद्धयर्थमावाह्य वरुणं तथा ।
सपूज्य मनसा देवं ध्यानयज्ञेन वै भवम् ॥१८॥
आचम्य त्रिस्तदा तीर्थे ह्यवगाह्य भवं स्मरन् ।
पुनराचम्य विधिवदभिमन्त्र्य महाजलम् ॥१६॥
अवगाह्य पुनस्तस्मिन् जपेद्वै चाघ मर्षणम् ।
तत्तोये भानुसोमाग्निमडलं च स्मरेद्वशी ॥२०॥
आचम्य च पुनस्तस्माज्जलादुत्तीर्य मंत्रवित् ।
प्रविश्य तीर्थमध्ये तु पुनः पुण्यविवृद्धये ॥२१॥

इसके उपरान्त "उद्धृतासिवराहेण" इस मन्त्र से पुन देह का शोधन करना चाहिए। मृत्तिका को लेकर अपने शरीर की भली-भाँति शुद्धि करे। इसके उपरान्त अन्य निर्मल वस्त्र धारण करे ॥१५॥ मन्त्र के वेत्ता पुरुष को "गन्ध द्वारा दुराधर्षाम्"—इत्यादि मन्त्र के द्वारा कपिला गौ के गोमय से प्रलेपन करना चाहिए ॥१६॥ इसके उपरान्त पुन स्नान करके उस मलिन वस्त्र का त्याग कर देवे। शुक्ल वस्त्र का परिधान करके ही स्नान करना चाहिये ॥१७॥ समस्त पापो की विशुद्धि के लिए वरुण का आवाहन करे और ध्यान यज्ञ से मन के द्वारा देव भव का भली-भाँति पूजन करना चाहिये ॥१८॥ उस समय मे तीन बार आचमन करके भव का स्मरण करते हुए तीर्थ मे अवगाहन करे। फिर आचमन करके विधि के साथ महाजल को अभिमन्त्रित करे ॥१९॥ पुन उसमे अवगाहन करके अघमर्षण मन्त्र का जप करना चाहिए। "ऋत च सत्य च" इत्यादि अघमर्षण का मन्त्र होता है। उस जल मे वशी को सूर्य, सोम और अग्नि के मण्डल का स्मरण करना चाहिए। ॥२०॥ इसके पश्चात् पुन आचमन करके मन्त्र वेत्ता पुरुष को जल से उत्तरण करना चाहिये। फिर तीर्थ के मध्य मे पुन पुण्यो की विशेष वृद्धि के लिये प्रवेश करे ॥२१॥

शृ गेण पर्णपुटकै पालाशै क्षालितैस्तथा।
सकुशेन सपुष्पेण जलेनैवाभिषेचयेत् ॥२२॥
रुद्रेण पवमानेन त्वरितास्येन मत्रवित् ।
तरत्समदीवर्गाद्यै स्तथा शातिद्वयेन च ॥२३॥
शातिधर्मेण चैकेन पञ्चब्रह्मपवित्रकै ।
तत्तन्मत्राधिदेवाना स्वरूप च ऋषीन् स्मरन् ॥२४॥
एव हि चाभिषिच्याथ स्वमूर्ध्नि पयसा द्विजा ।
ध्यायेच्च त्र्यबक देव हृदि पञ्चास्यमीश्वरम् ॥२५॥

आचम्याचमनं कुर्यात्स्वसूत्रोक्तं समीक्ष्य च ।
पवित्रहस्तः स्वासीनः शुचौ देशे यथाविधि ॥२६॥
अभ्युक्ष्य सकुशं चापि दक्षिणेन करेण तु ।
पिबेत्प्रक्षिप्य त्रिस्तोयं चक्री भूत्वा ह्यतन्द्रितः ॥२७॥
प्रदक्षिणं ततः कुर्याद्धिसापापप्रशांतये ।
एव संक्षेपतः प्रोक्तं स्नानाचमनमुत्त मम् ॥२८॥
सर्वेषा ब्राह्मणाना तु हितार्थं द्विजसत्तमाः ॥२९॥

पलास के पत्तो के दोनो मे जो कि जल से क्षालित कर लिये गये हो जल लेकर जिसमे कुशा और पुष्प हो भृङ्ग मन्त्र के द्वारा उस जल से अभिषेक करना चाहिए ॥२२॥ फिर मन्त्रो के ज्ञाता पुरुष को स्वरितान्त्य पवमान 'यो रुद्र"—इत्यादि मन्त्र से "शनो मित्र" तरत्स-मदी वर्गाध मन्त्र और "शनोदेवी" इस शान्ति धर्म मन्त्र से तथा सद्योजातादि पञ्च ब्रह्म पवित्रक मन्त्रो से उन-उन मन्त्रो के अधिष्ठाता देवो का और उनके ऋषियो के स्वरूप का स्मरण करते हुए अभिषेक करना चाहिए ॥२३॥२४॥ हे द्विजगण ! इस प्रकार से जल के द्वारा अपने मस्तक पर अभिषिञ्चन करके हृदय मे पाँच मुख वाले ईश्वर त्र्यम्बक देव का ध्यान करना चाहिए ॥२५॥ आचमन करके अपने सूत्र मे उक्त का समीक्षण करके आचमन करना चाहिए । फिर पवित्र हाथो वाला होकर शुचि देश मे यथाविधि बैठकर कुशा के साथ अभ्युक्षण करके दाहिने हाथ से पान करे। तीन बार जल को प्रक्षिप्त कर चक्री होकर अतन्द्रित हो जाना चाहिए। इसके अनन्त हिंसा के पाप की प्रशान्ति के लिये प्रदक्षिणा करे । इस प्रकार से यह उत्तम स्नान और आचमन का विधान मैंने सक्षेप मे वर्णित कर दिया है ॥२६॥२७॥ ॥२८॥ मैंने यह समस्त ब्राह्मणों के हित के सम्पादन के लिए ही हे द्विजोत्तमो ! वर्णन किया है ॥२९॥

संध्या, नित्यकर्म, पंचयज्ञविधानम्

आवाह येत्ततो देवी गायत्री वेदमातरम् ।
आयातु वरदा देवीत्यनेनैव महेश्वरीम् ॥१॥
पाद्यमाचमनीयं च तस्याश्चार्घ्यं प्रदापयेत् ।
प्राणायामत्रयं कृत्वा समासीनः स्थितोपि वा ॥२॥
सहस्र वा तदर्ध वा शतमष्टोत्तरं तु वा ।
गायत्री प्रणवेनैव त्रिविधेष्वेकमाचरेत् ॥३॥
अर्घ्यं दत्वा समभ्यर्च्य प्रणम्य शिरसा स्वयम् ।
उत्तमे शिखरे देवीत्युक्त्वोद्वास्य च मातरम् ॥४॥
प्राच्यालोक्याभिवंद्येशा गायत्री वेतमातरम् ।
कृतांजलिपुटो भूत्वा प्रार्थयेद्भास्करं तथा ॥५॥
उदुत्यं च तथा चित्रं जातवेदसमेव च ।
अभिवद्य पुनः सूर्यं ब्रह्माणं च विधानतः ॥६॥
तथा सौराणि सूक्तानि ऋग्यजुः सामजानि च ।
जप्त्वा प्रदक्षिणं पश्चात्त्रिः कृत्वा च विभावसोः ॥७॥

नन्दी ने कहा—इसके पश्चात् वेदों की माता गायत्री देवी का आवाहन करे। "आयातु वरदा देवि"—इत्यादि मन्त्र के द्वारा महेश्वरी का आवाहन करना चाहिए। फिर उस महादेवी गायत्री को अर्घ्य, पाद्य और आचमनीय देवे। इसके अनन्तर तीन प्राणायाम करे और पद्म आदि आसन मे बैठकर करे या स्थित होकर ही करे ॥१॥२॥ इसके उपरान्त एक सहस्र, पाँच सौ अथवा अष्टोत्तर शत बार प्रणव के सहित तीनो प्रकार के जपो मे से एक प्रकार का जाप करना चाहिये। यह तीन प्रकार के उत्तम, मध्यम और अधम जपो मे से जैसा भी समय प्राप्त हो एक तरह का जप करे। इसके पूर्व स्वय सूर्यदेव को अर्घ्य देवे, भली-भाँति अर्चन करे और शिर से प्रणाम करके ही जप करना चाहिये "उत्तमे शिखरे देवि"—इत्यादि मन्त्र के द्वारा गायत्री माता का उद्वास

न करे ॥३॥४॥ पूर्व दिशा में देखकर और देवेशी वेदमाता गायत्री की अभिवन्दना करके फिर हाथ जोडकर भगवान् भुवन भास्कर की प्रार्थना करे ॥५॥ उदुत्य, चित्र तथा जात वेदा (अग्नि) को नमस्कार करके फिर सूर्य और ब्रह्मा की विधान पूर्वक अभिवन्दना करनी चाहिए ॥६॥ इसके अनन्तर सौर सूक्त तथा ऋक्, यजु और साम का जप अर्थात् पाठ करके फिर विभा वसुदेव की तीन प्रदक्षिणा करे ॥७॥

आत्मानं चांत रात्मानं परमात्मानमेव च ।
अभिवंद्य पुनः सूर्यं ब्रह्माणं च विभावसुम् ॥८॥
मुनीन्पितॄन् यथान्यायं स्वनाम्नावाहयेत्ततः ।
सर्वानावाहयामीति देवानावाह्य सर्वतः ॥९॥
तर्पयेद्विधिना पश्चात्प्राङ् मुखो वा ह्यु दङ् मुखः ।
ध्यात्वा स्वरूपं तत्तत्वमभिवंद्य यथाक्रमम् ॥१०॥
देवानां पुष्पतोयेन ऋषीणां तु कुशाम्भसा ।
पितॄणा तिलतोयेन गन्धयुक्तेन सर्वतः ॥११॥
यज्ञोपवीती देवाना निवीती ऋपितर्पणम् ।
प्राचीनावीती विप्रेन्द्र पितॄणा तर्पयेत् क्रमात् ॥१२॥
अंगुल्यग्रण वै धीमास्तर्पयेद्देवतर्पणम् ।
ऋषीन् कनिष्ठागुलिना श्रोत्रियः सर्वसिद्धये ॥१३॥
पितॄंस्तु तर्पयेद्विद्वान्दक्षिणांगुष्ठकेन तु ।
तथैव मुनिशार्दूल ब्रह्मयज्ञ यजेद्द्विजः ॥१४॥

फिर आत्मा, अन्तरात्मा और परमात्मा की अभिवन्दना करके सूर्य, ब्रह्मा और विभावसु को तथा मुनिगण और पितरों को यथोचित विधि से अपने नाम से आवाहित करना चाहिये। अन्त में मैं सबका आवाहन करता हूँ, यह कहकर सभी ओर से देवों का आवाहन करे फिर विधि पूर्वक प्राङ् मुख अथवा उदङ् मुख होकर तर्पण करे। स्वरूप का ध्यान करके उनके तत्व को क्रम से अनुसार प्रणाम करे ॥८॥९॥

॥१०॥ देवों का पुष्प युक्त जल से, ऋषियों का कुश युक्त जल से और पितरों का गन्ध और तिलों से समन्वित जल से तर्पण करना चाहिये। ॥११॥ हे विप्रेन्द्र ! देवों का तर्पण यज्ञोपवीती होकर करे, ऋषियों का तर्पण निवीती होकर और पितरों का तर्पण प्राचीन वीती होकर करना चाहिए ॥१२॥ देवों का तर्पण अङ्गुली के अग्रभाग से करे और धीमान् श्रोत्रिय पुरुष को ऋषियों का तर्पण समस्त सिद्धि के लिये कनिष्ठ अङ्गुली से करना चाहिए ॥१३॥ विद्वान् पुरुष को पितृगण का तर्पण दक्षिण अङ्गुष्ठ से करना चाहिये। हे मुनि शार्दूल ! इसी भाँति से द्विज को ब्रह्म यज्ञ का यजन करना चाहिये ॥१४॥

देवयज्ञं च मानुष्यं भूतयज्ञं तथैव च।
पितृयज्ञं च पूतात्मा यज्ञकर्मपरायण ॥१५॥
स्वशाखाध्ययनं विप्र ब्रह्मयज्ञ इति स्मृत।
अग्नौ जुहोति यच्चान्नं देवयज्ञ इति स्मृत ॥१६॥
सर्वेषामेव भूताना बलिदानं विधानत।
भूतयज्ञ इति प्रोक्तो भूतिदः सर्वदेहिनाम् ॥१७॥
सदारान्सर्वतत्त्वज्ञान्ब्राह्मणान्वेदपारगान्।
प्रणम्य तेभ्यो यद्दत्तमन्नं मानुष उच्यते ॥१८॥
पितृनुद्दिश्य यद्दत्तं पितृयज्ञ स उच्यते।
एवं पञ्च महायज्ञान्कुर्यात् सर्वार्थसिद्धये ॥१९॥
सर्वेषां शृणु यज्ञानां ब्रह्मयज्ञ परः स्मृत।
ब्रह्मयज्ञरतो मर्त्यो ब्रह्मलोके महीयते ॥२०॥
ब्रह्मयज्ञेन तुष्यति सर्वे देवा सवासवा.।
ब्रह्मा च भगवान्विष्णु शंकरो नीललोहित ॥२१॥

देव यज्ञ मानुष्य, भूतयज्ञ और पितृयज्ञ—इनसे भूत आत्मा वाला यज्ञ कर्म मे परायण पुरुष जो वेद मे अपनी शाखा का अध्ययन करता है हे विप्र ! वही ब्रह्म यज्ञ कहा जाता है। अग्नि मे जो अन्न का

हवन करता है वह देव यज्ञ कहा गया है ॥१५॥१६॥ समस्त भूतों का विधान पूर्वक बलिदान जिसमें किया जाता है वह भूत यज्ञ कहा गया है जो कि समस्त देहधारियों के लिये भूति का प्रदान करने वाला होता है ॥१७॥ सम्पूर्ण तत्वों के ज्ञाता और वेदों के पारङ्गत पत्नी के सहित ब्राह्मणों को प्रणाम पूर्वक जो अन्न का दान दिया जाता है वह मानुष यज्ञ के नाम से कहा जाता है ॥१८॥ पितृगण का उद्देश्य करके जो कुछ भी दिया गया है वह पितृ यज्ञ कहा जाता है। इस प्रकार से ये पाँच महायज्ञ होते हैं। इनको सम्पूर्ण अर्थों की सिद्धि के लिये करना ही चाहिये ॥१९॥ इन समस्त यज्ञों में जो ब्रह्म यज्ञ होता है वह पर कहा गया है। ब्रह्म यज्ञ में अनुरत रहने रहने वाला मनुष्य ब्रह्म लोक में महिमान्वित होकर प्रतिष्ठित हुआ करता है ॥२०। ब्रह्म यज्ञ से वासव (इन्द्र) के सहित समस्त देवगण सन्तुष्ट हुआ करते हैं। ब्रह्मा, विष्णु भगवान् और नील लोहित शङ्कर ये सभी परम सन्तुष्ट हो जाते हैं ॥२१॥

वेदाश्च पितरः सर्वे नात्र कार्या विचारणा ।
ग्रामाद्बहिर्गतो भूत्वा ब्राह्मणो ब्रह्मयज्ञवित् ॥२२॥
यावत्त्वदृष्टमभवदुटजाना दृष्ट नरः ।
प्राच्यामुदीच्यां च तथा प्रागुदीच्यामथापि वा ॥२३॥
पुण्यमाचमन कुर्याद्ब्रह्मयज्ञार्थमेव तत् ।
प्रीत्यर्थं च ऋचा विप्राः त्रिः पीत्वाप्यप्राश्य च ॥२४॥
यजुषा परिमृज्यैव द्विः प्रक्षाल्य च वारिणा ।
प्रीत्यर्थं सामवेदानामुपस्पृश्य च मूर्धनि ॥२५॥
स्पृशेदथर्ववेदानां नेत्रे चाङ्गिरसां तथा ।
नासिके ब्राह्मणोऽङ्गानां क्षाल्यक्षाल्य च वारिणा ॥२६॥
अष्टादशपुराणानां ब्रह्माद्यानां तथैव च ।
तथा चोपपुराणानां सौरादीनां यथाक्रमम् ॥२७॥

पुण्यानामितिहासानां शैवादीनां तथैव च ।
श्रोत्रे स्पृशेद्धि तुष्ट्यर्थं हृद्देश्यं तु ततः स्पृशेत् ॥२८॥

वेद और समस्त पितृगण भी इस ब्रह्म यज्ञ से संतृप्त हो जाते है—इस विषय मे कुछ भी विचार नही करना चाहिए। अब उस ब्रह्म यज्ञ के करने के विधान को बताया जाता है कि ब्रह्म यज्ञ के वेत्ता ब्राह्मण को ग्राम से बाहिर जाकर रहना चाहिये ॥२२॥ जब तक अदृष्ट हो वहाँ पर मनुष्य को उटजो (झोपडियो) का छद होना चाहिये। प्राची (पूर्व दिशा) में और उदीची (उत्तर दिशा) मे अथवा प्रागुदीची मे स्थित होकर रहे ॥२३॥ ब्रह्म यज्ञ के ही लिये पुण्य आचमन करे। हे विप्रगण ! ऋचाओ को प्रीति के लिये प्लावित कर करके तीन बार पीवे ॥२४॥ इसी प्रकार से यजुषो का दो बार जल से प्रक्षालन करके परिमार्जन करे। तथा सामवेदो की प्रीति के लिये मस्तक मे उपस्पर्शन करना चाहिये ॥२५॥ अथर्व वेदो की प्रीति के अर्थ नेत्र मे करे तथा आङ्गिरसो की प्रीति के लिये नासिका मे जल से उपस्पर्शन करे। ब्राह्मण को वेदाङ्गो की प्रीति के लिये जल से क्षालन करना चाहिये ॥२६॥ अष्टादश पुराणो की तथा ब्रह्मादि की और उपपुराणो की सौरादि की प्रीति के लिए यथाक्रम करे ॥२७॥ पुण्य इतिहासो की तथा शैवादि की प्रीति के लिये श्रोत्र मे स्पर्श करे और इसके पश्चात् तुष्टि के लिये हृद्देश मे स्पर्श करना चाहिये ॥२८॥

कल्पादीनां तु सर्वेषां कल्पवित्कल्पवित्तमाः ।
एवमाचम्य चास्तीर्य दर्भपिंजूलमात्मनः ॥२९॥
कृत्वा पाणितलेधी मानात्मनो दक्षिणोत्तरम् ।
हेमांगुलीयसंयुक्तो ब्रह्मवधयुतोपि वा ॥३०॥
विधिवद्ब्रह्मयज्ञं च कुर्यात्सूत्री समाहितः ।
अकृत्वा च मुनिः पञ्च महायज्ञान्द्विजोत्तमः ॥३१॥
भुक्त्वा च सूकराणां तु योनौ वै जायते नरः ।
तस्मात्सर्वप्रयत्नेन कर्तव्याः शुभमिच्छता ॥३२॥

ब्रह्मयज्ञादथ स्नानं कृत्वादौ सर्वथात्मनः ।
तीर्थं सगृह्य विधिवत्प्रविशेच्छिबिरं वशी ॥३३॥
बहिरेव गृहात्पादौ हस्तौ प्रक्षाल्य वारिणा ।
भस्मस्नानं ततः कुर्याद्विधिवद्देहशुद्धये ॥३४॥
शोध्य भस्म यथान्याय प्रणवेनाग्निहोत्रजम् ।
ज्योतिः सूर्य इति प्रातर्जुहुयादुदिते यतः ॥३५॥

हे कल्प वित्तमो ! कल्प के वेत्ता पुरुष को समस्त कल्प आदि की प्रीति के लिये इस प्रकार से आचमन करके अपना दर्भ पिंजूल को आस्तृत करे। बुद्धिमान पुरुष अपने दक्षिण, उत्तर में पाणितल में करे। सुवर्ण की अङ्गुलीय (अँगूठी) से सयुक्त हो अथवा ब्रह्म बन्ध से युक्त होवे ॥२९॥३०॥ सूत्री अत्यन्त समाहित होता हुआ विधि विधान के साथ ब्रह्म यज्ञ का सम्पादन करे। द्विजो मे उत्तम मुनि इन पाँचो महायज्ञो को न करके भोजन कर लेता है तो वह मनुष्य सूकरो की योनि मे जाकर उत्पन्न होता है। इसलिये सम्पूर्ण प्रयत्नो के साथ शुभ की इच्छा रखने वाले मनुष्य को ये पाँच महायज्ञ अवश्य ही करने चाहिए ॥३१॥३२॥ ब्रह्मयज्ञ के अनन्तर अपने शरीर का निमज्जन स्वरूप स्नान चाहिय और इसके पश्चात् तीर्थ का सग्रहण करके शिविर मे विधिवत् वशी पुरुष को प्रवेश करना चाहिये ॥३३॥ घर के बाहिर ही जल से हाथो और पैरो का प्रक्षालन करके फिर भस्म स्नान विधि पूर्वक देह की शुद्धि के लिए करना चाहिये ॥३४॥ अग्निहोत्र से उत्पन्न होने वाली भस्म को प्रणव के द्वारा यथोचित रूप से शोधित करे। सूर्य ज्योति है अतः प्रातःकाल मे सूर्य के उदित होने पर हवन करना चाहिये ॥३५॥

ज्योतिरग्निस्तथा सायं सम्यक् चानुदिते मृषा ।
तस्मादुदितहोमस्य भसितं पावनं शुभम् ॥३६॥
नास्ति सत्यसमं यस्मादसत्यं पातकं च यत् ।
ईशानेन शिरोदेशं मुखं तत्पुरुषेण च ॥३७॥

उरोदेशमघोरेण गुह्यं वामेन सुव्रताः।
सद्येन पादौ सर्वांगं प्रणवेनाभिषेचयेत् ॥३८॥
ततः प्रक्षालयेत्पादं हस्तं ब्रह्मविदा वरः।
व्यपोह्य भस्म चादाय देवदेवमनुस्मरन् ॥३९॥
मंत्रस्नानं ततः कुर्यादापोहिष्ठादिभिः क्रमात्।
पुण्यैश्चैव तथा मंत्रैर्ऋग्यजुः सामसंभवैः ॥४०॥
द्विजानां तु हितार्यंवं कथित स्नानमद्य ते।
संक्षिप्य यः सकृत्कुर्यात्स याति परमं पदम् ॥४१॥

अग्नि ज्योति है अतः उसी प्रकार से भली-भाँति हवन करना चाहिये। अनुदिन मे करना मृगा होता है। इसलिये उदित मे किये हुए होम मे स्थित ही भस्म परम पावन एवं शुभ होता है ॥३६॥ जिस कारण से सत्य सर्वोपरि परम उत्तम है और इसके समान अन्य कुछ भी नही है और असत्य महान् पातक होता है। "ईशान" से शिरो देश का, "तत्पुरुष" से मुख का, "अघोर" से उर स्थल का और "वाम" से गुह्य का, "सद्य" से पैरो का और सर्वाङ्ग का प्रणव से अभिषिञ्चन करना चाहिए ॥३७॥३८॥ इसके अनन्तर ब्रह्म के वेत्ताओ मे श्रेष्ठ पुरुष को पाद और हस्त का प्रक्षालन करना चाहिये। भस्म को लाकर और व्यपोहित करके देवो के देव का अनुस्मरण करते हुए फिर क्रम से "आपोहिष्ठा मयो भुवः"--इत्यादि के द्वारा मन्त्र स्नान करना चाहिए जो कि परम पुण्य, पवित्र ऋक् यजु और साम वेदो के ये मन्त्र हैं ॥३९॥ ॥४०॥ द्विजो के हित के लिये इस प्रकार से आज मैंने तुमको इस स्नान का वर्णन करके सुना दिया है। जो एक बार भी सक्षेप मे कर लेगा वह भी परम पद को प्राप्त हो जाता है ॥४१॥

लिंगार्चन विधि

वक्ष्यामि शृणु संक्षेपाल्लिंगार्चनविधिक्रमम्।
वक्तुं वर्षशतेनापि न शक्यं विस्तरेण यत् ॥१॥

एवं स्नात्वा यथान्यायं पूजास्थानं प्रविश्य च ।
प्रोणायामत्रयं कृत्वा ध्यायेद्देवं त्रियंबकम् ॥२॥
पञ्चवक्रं दश भुज शुद्धस्फटिकसन्निभम् ।
सर्वाभरणसंयुक्तं चित्रांबरविभूषितम् ॥३॥
तस्य रूपं समाश्रित्य दाहनप्लावनादिभिः ।
शैवीं तनुं समास्थाय पूजयेत्परमेश्वरम् ॥४॥
देहशुद्धिं च कृत्वैव मूलमंत्रं न्यसेत्क्रमात् ।
सर्वत्र प्रणवेनैव ब्रह्माणि च यथाक्रमम् ॥५॥
सूत्रे नमः शिवायेति छंदांसि परमे शुभे ।
मंत्राणि सूक्ष्मरूपेण सस्थितानि यतस्ततः ॥६॥
न्यग्रोधबीजे न्यग्रोधस्तथा सूत्रे तु शोभने ।
महत्यपि महद्ब्रह्म संस्थितं सूक्ष्मवत्स्वयम् ॥७॥

शैलादि ने कहा—अब मैं लिंग के अर्चन की विधि क्रम से से कहता हूं उसे तुम श्रवण करो । यदि इसे विस्तार पूर्वक कहा जावे तो सौ वर्ष मे भी यह वर्णन नही की जा सकती है ॥१॥ इस प्रकार से जैसा कि ऊपर बताया जा चुका है स्नान करके और न्याय पूर्वक पूजा के स्थान मे प्रवेश करके तीन प्राणायाम करे और फिर देव त्रियम्बक का ध्यान करना चाहिए ॥२॥ उनके ध्यान करने मे इन बातो का ध्यान रखे कि त्र्यम्बक भगवान् के पाँच मुख है, दश भुजाएं है और उनका अङ्ग शुद्ध स्फटिक मणि के समान दिव्य है । उन देव का वपु सम्पूर्ण आभूषणो से समन्वित है तथा चित्र-विचित्र अम्बर से समलङ्कृत है । दाहन और प्लावन आदि के द्वारा उनके रूप का समाश्रित करके स्वयं शैवी तनु मे समास्थित होकर फिर परमेश्वर का पूजन करना चाहिए ॥२॥३॥४॥ अपने देह की शुद्धि करके प्रणव से युक्त "नम शिवाय"—इस मूल मन्त्र का क्रम से न्यास करे । सर्वत्र प्रणव के द्वारा ही और यथा क्रम ब्रह्मो का न्यास करे ॥५॥ परम शुभ "नमः शिवाय"—इस सूत्र मे छन्द और मन्त्र सूक्ष्म रूप से सस्थित

रहा करते हैं। जिस प्रकार वट के फल मे जो अत्यन्त सूक्ष्म न्यग्रोध (वड) के वीज होते हैं उस एक वीज मे इतना विशाल न्यग्रोध का वृक्ष सूक्ष्म रूप से स्थित रहा करता है वैसे ही इस शोभन सूत्र मे महान् से महान् ब्रह्म स्वय सूक्ष्म वत् सस्थित रहा करता है ॥६॥७॥

सेचयेदर्चनस्थान गधचदनवारिणा ।
द्रव्याणि शोधयेत्पश्चात्क्षालनप्रोक्षणादिभि ॥८॥
क्षालन प्रोक्षण चैव प्रणवेन विधीयते ।
प्रोक्षणी चार्घ्यपात्र च पाद्यपात्रमनुक्रमात् ॥६॥
तथा ह्याचमनीयार्थं कल्पित पात्रमेव च ।
स्थापये द्विधिना धीमानवगुण्ठ्य यथाविधि ॥१०॥
दर्भैराच्छादयेच्चैव प्रोक्षयेच्छुद्धवारिणा ।
तेषु तेष्वथ सर्वेषु क्षिपेत्तोय सुशीतलम् ॥११॥
प्रणवेन क्षिपेत्तेषु द्रव्याण्यालोक्य बुद्धिमान् ।
उशीर चदन चैव पाद्ये तु परिकल्पयेत् ॥१२॥
जातिकक्कोलकर्पूरबहुमूलतमालकम् ।
चूर्णयित्वा यथान्याय क्षिपेदाचमनीयके ॥१३॥
एव सर्वेषु पात्रेषु दापयेच्चदन तथा ।
कर्पूर च यथान्याय पुष्पाणि विविधानि च ॥१४॥

देवार्चन करने का जो स्थान है उसका गन्ध, चन्दन से मिश्रित जल के द्वारा सेचन करे। इसके पश्चात् प्रक्षालन तथा प्रोक्षण आदि के द्वारा द्रव्यों का शोधन करना चाहिए ॥८॥ सबका क्षालन तथा प्रोक्षण प्रणव के द्वारा ही किया जाता है। प्रोक्षणी पात्र, अर्घ्य पात्र, और पाद्य पात्र इनका अनुक्रम से साधन करे ॥६॥ उसी प्रकार आचमनीय के लिए जो पात्र कल्पित किया है उसे धीमान् अर्चक को यथा विधि अवगुण्ठित करके स्थापित करना चाहिए ॥१०॥ दर्भो से आच्छादन करे और शुद्ध जल से प्रोक्षण करे। उन उन सबमें सुशीतल जल का क्षेप

करना चाहिए ॥११॥ बुद्धिमान् पुरुष द्रव्यों का आलोकन करके उन पर प्रणव से क्षेपण करे। पाद्य मे उशीर और चन्दन को परिकल्पित करना चाहिए ॥१२॥ जो आचमनीय के लिये पात्र हो उसके जल मे जाति, कक्कोल, कर्पूर, बहुमूल अर्थात् शतावर और तमालक—इन समस्त द्रव्यो का चूर्ण करके यथोचित रूप से क्षेपण करना चाहिए ॥१३॥ इस प्रकार स सभी पात्रो मे चन्दन दिलवाना चाहिए इसके अतिरिक्त कर्पूर तथा विविध भाँति के पुष्प भी डाल देने चाहिए ॥१४॥

कुशाग्रमक्षतांश्चैव यवव्रीहितिलानि च।
आज्यसिद्धार्थपुष्पाणि भसितं चार्घ्यपात्रके ॥१५॥
कुशपुष्पयवव्रीहिबहुमूलतमालकम् ।
दापयेत्प्रोक्षणीपात्रे भसितं प्रणवेन च ॥१६॥
न्यसेत्पंचाक्षरं चैव गायत्री रुद्रदेवताम् ।
केवलं प्रणवं वापि वेदसारमनुत्तमम् ॥१७॥
अथ संप्रोक्षयेत्पश्चाद् द्रव्याणि प्रणवेन तु।
प्रोक्षणीपात्रसंस्थेन ईशानाद्यैश्च पञ्चभिः ॥१८॥
पार्श्वतो देवदेवस्य नंदिनं मां समर्चयेत् ।
दीप्तानलायुतप्रख्यं त्रिनेत्रं त्रिदशेश्वरम् ॥१९॥
बालेंदुमुकुटं चैव हरिवक्त्रं चतुर्भुजम् ।
पुष्पमालाधरं सौम्यं सर्वाभरणभूषितम् ॥२०॥
उत्तरे चात्मनः पुण्यां भार्यां च मरुतां शुभाम्।
सुयशां सुव्रतां चाम्बापादमंडनतत्पराम् ॥२१॥

कुशा का अग्रभाग तण्डुल, यव, व्रीहि, तिल, घृत, सर्षप पुष्प और भस्म के द्रव्य अर्घ्य के पात्र में प्रक्षिप्त करे। प्रोक्षणी पात्र मे प्रणव के द्वारा जो कि वेद का सार है—कुशा, पुष्प, यव, व्रीहि, शता-वर, तमाल और भस्म डालने चाहिये ॥१५॥१६॥ पञ्चाक्षरी मन्त्र का और रुद्र देवता वाली गायत्री का न्यास करे। अथवा केवल समस्त वेदों

के सार स्वरूप तथा सर्वोत्तम प्रणव का न्यास करना चाहिए ।।१७।। इसके अनन्तर प्रणव से पश्चात् द्रव्यों का संप्रोक्षण करे जो कि 'ईशानः सर्व विद्यानाम्''—यहाँ से आरम्भ करके "रुद्राय नमः"—इसके अन्त तक यजुर्वेद के पाँच मन्त्र हैं उनसे प्रोक्षणी पात्र मे सस्थित है। उससे करना चाहिए ।।१८।। देवदेव के पार्श्व मे स्थित नन्दी मेरा अर्चन करे। नन्दी स्वय अपने स्वरूप को बतलाते हैं कि वह प्रदीप्त अग्नि के दश सहस्र गुणित प्रख्या वाले हैं. तीन नेत्रो से युक्त, देवो के ईश्वर, मुकुट मे बालचन्द्र को धारण करने वाले, वानर के सदृश मुख से युक्त, चार भुजाओं वाले, पुष्पों की माला धारण करने वाले, अति सौम्य तथा समस्त आभूषणों से समलङ्कृत हैं। महेश्वर के दक्षिण मे पार्श्व मे तो नन्दी स्वय विराजमान हैं और उत्तर पार्श्व मे अपनी भार्या नन्दी की भार्या हैं उनका अर्चन करना चाहिए। यह परम पुण्यमयी मरुता हैं जो अतिशुभा, सुयशा, सुव्रता और सर्वदा, जगदम्बा भवानी के बाँहों के अलङ्करण की क्रिया मे तत्पर रहने वाली है ।।१६।।२०।।२१।।

एवं पूज्य प्रविश्यांतर्भवनं परमेष्ठिनः ।
दत्वा पुष्पांजलिं भक्त्या पञ्चमूर्धसु पञ्चभिः ।।२२।।
गंधपुष्पैस्तथा धूपैर्विविधैः पूज्य शंकरम् ।
स्कंदं विनायकं देवीं लिंगशुद्धिं च कारयेत् ।।२३।।
जप्त्वा सर्वाणि मंत्राणि प्रणवादिनमोंतकम् ।
कल्पयेदासनं पश्चात्पद्माख्यं प्रणवेन तत् ।।२४।।
तस्य पूर्वदलं साक्षादणिमामयमक्षरम् ।
लघिमा दक्षिणं चैव महिमा पश्चिमं तथा ।।२५।।
प्राप्तिस्तथोत्तरं पत्रं प्राकाम्यं पावकस्य तु ।
ईशित्वं नैऋतं पत्र वशित्वं वायुगोचरे ।।२६।।
सर्वज्ञत्वं तथैशान्यं कर्णिका सोम उच्यते ।
सोमस्याधस्तथा सूर्यस्तस्याध पावकः स्वयम् ।।२७।।

धर्मादयो विदिक्ष्वेते त्वनंतं कल्पयेत्क्रमात् ।
अव्यक्तादिचतुर्दिक्षु सोमस्यांते गुणत्रयम् ॥२८॥

इस प्रकार नन्दी और उसकी भार्या का पूजन करके फिर भगवान् परमेष्ठी के भवन मे अन्दर प्रवेश करे । वहाँ उनके पाँचो मस्तको पर भक्ति की भावना से पुष्पाञ्जलि देवे ॥२२॥ फिर गन्धाक्षत, पुष्प, धूप, दीप आदि विविध प्रकार के उपचारों के द्वारा भगवान् शङ्कर की पूजा करे तथा स्कन्द, विनायक और देवी की अर्चना करके लिङ्ग शुद्धि करनी चाहिए ॥२३॥ प्रणव से आदि लेकर नमः—इसके अन्त तक अर्थात् "ॐ निधनप तपे"—यहाँ से आरम्भ करके "परम लिङ्गाय नमः" इसके अन्त तक समस्त मन्त्रो का जप करके पीछे प्रणव के द्वारा पद्म नामक आसन की कल्पना करे । अर्थात् पद्मासन लगा लेवे ॥२४॥ उसका पूर्व दल साक्षात् अणिमा सिद्धि रूप नाश से शून्य है । दक्षिण दल लघिमा सिद्धि के रूप वाला है, महिमा नामक सिद्धि के स्वरूप वाला पश्चिम दल है ॥२५॥ प्राप्ति सिद्धि स्वरूप उत्तर पत्र है, प्राकाम्य सिद्धि पावक का स्वरूप है, ईशत्व सिद्धि नैऋत पत्र है और वशित्व सिद्धि वायु कोण का पत्र है । सर्वज्ञत्व ऐशान्य है और कमल की कर्णिका अर्थात् मध्य भाग सोम कहा जाता है । सोम के नीचे सूर्य है और सूर्य के नीचे के भाग स्वय पावक है ॥२६॥२७॥ धर्म, ज्ञान, वैराग्य और ऐश्वर्य रूप वाले चार आग्नेय आदि उपदिशाओं मे कल्पित क्रम से करने चाहिये । अव्यक्त, महत्तत्व, अहङ्कार और चित्त इन चारों को पूर्वादि दिशाओं मे सोम के अन्त मे और ऊपर मे सत्व, रज और तम इन तीनो गुणो को परिकल्पित करे ॥२८॥

आत्मत्रयं ततश्चोर्ध्वं तस्यान्ते शिवपीठिका ।
सद्योजातं प्रपद्यामीत्यावाह्य परमेश्वरम् ॥२९॥
वामदेवेन मंत्रेण स्थापयेदासनोपरि ।
सान्निध्यं रुद्रगायत्र्या अघोरेण निरोधयेत् ॥३०॥

ईशानः सर्वविद्यानामिति मंत्रेण पूजयेत् ।
पाद्यमाचमनीयं च विभोश्चार्घ्यं प्रदापयेत् ॥३१॥
स्नापयेद्विधिना रुद्रं गंधचंदनवारिणा ।
पञ्चगव्य विधानेन गृह्य पात्रेभिमंत्र्य च ॥३२॥
प्रणवेनैव गव्यैस्तु स्नापयेच्च यथाविधि ।
आज्येन मधुना चैव तथा चेक्षुरसेन च ॥३३॥
पुण्यैर्द्रव्यैर्महादेवं प्रणवेनाभिषेचयेत् ।
जलभांडैः पवित्रैस्तु मंत्रैस्तोय क्षिपेत्ततः ॥३४॥
शुद्धि कृत्वा यथान्यायं सितवस्त्रेण साधकः ।
कुशापामार्गकर्पूरजातिपुष्पकचंपकैः ॥३५॥
करवीरैः सितैश्चैव मल्लिकाकमलोत्पलैः ।
आपूर्य पुष्पैः सुशुभैः चंदनाद्यैश्च तज्जलम् ॥३६॥

उसके ऊपर विश्व, तैजस और प्राज्ञ रूप वाले आत्मत्रय को और उसके अन्त में अर्थात् आत्मत्रय के ऊपर शिवपीठिका वेदी की परिकल्पना करनी चाहिए। इसके पश्चात् मैं भगवान् सद्योजात की शरण में समागत हो गया हूँ, इससे परमेश्वर का आवाहन करे ॥२६॥ फिर वामदेव मन्त्र के द्वारा उन देवों के देव को आसन के ऊपर संस्थापित करना चाहिए। रुद्र गायत्री देव का सन्निधीकरण करे और अघोर मन्त्र से निरुद्धीकरण करना चाहिये। "ईशानः सर्व विद्यानाम्" इत्यादि मन्त्र के द्वारा पूजन करे और फिर विभु की सेवा में अर्घ्य, पाद्य तथा आचमनीय प्रस्तुत करने चाहिये ॥३०॥३१॥ इसके अनन्तर भगवान् रुद्र का गन्ध-चन्दन मिश्रित जल से विधि-विधान के सहित स्नान करना चाहिये। पञ्चगव्य को विधान पूर्वक बनाकर ग्रहण करे और पात्र में उसे अभिमन्त्रित करे। गाय का दूध, दधि, घृत, मूत्र और गोमय का पञ्चगव्य होता है। गाय का दूध, दधि घृत, मधु और शर्करा इन पाँचों का पञ्चामृत होता है ॥३२॥ प्रणव के द्वारा ही यथाविधि पञ्च गव्यों से स्नान करावे। आज्य (घृत) से, मधु से और ईख के रस

से तथा पुण्य द्रव्यो से महादेव का प्रणव के द्वारा अभिषेचन करना चाहिये। परम पवित्र मन्त्रो के द्वारा जल के भाण्डो से जल को शिव के ऊपर प्रक्षिप्त करना चाहिए ॥३३॥३४॥ श्वेत वस्त्र से यथोचित् रूप से साधक को जल की शुद्धि छानकर कर लेनी चाहिये। कुशा, अपामार्ग (औंगा), कपूर, जाति पुष्प, चम्पा के पुष्प, श्वेत-करवीर, मल्लिका पुष्प और कमलोत्पलो के शुभ पुष्पो से तथा चन्द-नादि से उस जल को आपूरित कर लेना चाहिये ॥३५॥३६॥

न्यसेन्मत्राणि तत्तोये सद्योजातादिकानि तु ।
सुवर्णकलशेनाथ तथा वै राजतेन वा ॥३७॥
ताम्रण पद्मपत्रेण पालाशेन दलेन वा ।
शखेन मृन्मयेनाथ शोधितेन शुभेन वा ॥३८॥
सकूर्चेन सपुष्पेण स्नापयेन्मत्रपूर्वकम् ।
मत्राणि ते प्रवक्ष्यामि शृणु सर्वार्थसिद्धये ॥३९॥
यैलिंग सकृदप्येवं स्नाप्य मुच्येत मानवः ।
पवमानेन मत्रज्ञाः तथा वामीयकेन च ॥४०॥
रुद्रेण नीलरुद्रेण श्रीसूक्तेन शुभेन च ।
रजनीसूक्तकेनैव चमकेन शुभेन च ॥४१॥
होतारेणाथ शिरसा अथर्वेण शुभेन च ।
शान्त्याचाथ पुन. शान्त्या भारुंडेनारुणेन च ॥४२॥
वारुणेन च ज्येष्ठेन तथा वेदव्रतेन च ।
तथातरेण पुण्येन सूक्तेन पुरुषेण च ॥४३॥
त्वरितेनैव रुद्रेण कपिना च कपर्दिना ।
आवोसजेति साम्ना तु बृहच्चद्रेण विष्णुना ॥४४॥
विरूपाक्षेण स्कदेन शतऋग्भि. शिवैस्तथा ।
पञ्चब्रह्मैश्च सूत्रेण केवलप्रणवेन च ॥४५॥
स्नापयेद्देवदेवेशं सर्वपापप्रशांतये ।
वस्त्रं शिवोपवीतं च तथा ह्याचमनीयकम् ॥४६॥

इसके अनन्तर सद्योजातादि मन्त्रो का उस जल में न्यास करे। फिर सुवर्ण के कलस से अथवा चाँदी के निर्मित पात्र से या ताम्र के पात्र से, पद्म पत्र, पलाश का पत्र अथवा दल, शङ्ख वा परम शोधित एव शुभ मिट्टी के पात्र से कूर्च के सहित एवं पुष्प के सहित मन्त्रो के साथ स्नपन करना चाहिये। उन मन्त्रो को अब मैं तुमको समस्त अर्थों की सिद्धि के लिये आपको बताऊँगा, उनका तुम श्रवण करो ॥३७॥३८॥ वे सब ऐसे मन्त्र है जिनके द्वारा इस प्रकार की विधि से लिंग का एक बार भी स्नपन कराने से मानव मुक्त हो जाया करता है। हे मन्त्रो के ज्ञाताओ! पवमान सज्ञा वाले तत्तत् शाखा के मन्त्र से तथा वामसूक्त से, रुद्राध्याय से, नील रुद्र अथर्व सज्ञा वाले सतत् मन्त्रो से, शुभ श्री सूक्त से, रजनी सूक्त से, शुभ चमक से, अथर्व के शुभ होतार शिर सम मन्त्रों से, शाति, भारुण्ड और आरुण मन्त्रो से, ज्येष्ठ वारुण मन्त्र से, वेद व्रत, पुरुष सूक्त से, त्वरित रुद्र, से कपर्दी, कपि से, आवोसज इस साम सूक्त से, बृहच्चन्द्र, विष्णु, विरूपाक्ष, स्कन्द, शिव-शत ऋचाओ से, पञ्च ब्रह्मो से, सूत्र और केवल प्रणव से इनमे किसी भी एक से देव देवेश का समस्त पापो की शान्ति के लिए स्नपन कराना चाहिये। अभिषेक सबसे उत्तम फल होता है। पूजा से अधिक होम, होम से भी उत्तम तर्पण, तर्पण से भी अधिक जप और सबसे अधिक एव श्रेष्ठ अभिषेक को बताया गया है। इस स्नपन के अनन्तर वस्त्र, शिवोपवीत और आचमनीय देना चाहिये ॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥

गध पुष्पं तथा धूप दीपमन्नं क्रमेण तु ।
तोय सुगधित चैव पुनराचनीयकम् ॥४७॥
मुकुटं च शुभ छत्रं तथा वै भूषणानि च ।
दापयेत्प्रणवेनैव मुखवासादिकानि च ॥४८॥
ततः स्फटिकसंकाश देवं निष्कलमक्षरम् ।
कारण सर्वदेवाना सर्वलोकमय परम् ॥४९॥

ब्रह्म द्रविष्णुरुद्राद्यं ऋं पिदेवैरगोचरम्   ।
वेदविद्भिर्हि वेदान्तैस्त्वगोचरमिति श्रु ति. ॥५०॥
आदिमध्यातरहित भेषज   भवरोगिणाम् ।
शिवतत्त्वमिति ख्यात शिवलिंगे व्यवस्थितम् ॥५१॥
प्रणवेनैव मन्त्रेण पूजयेल्लिगमूर्धनि   ।
स्तोत्र जपेच्च विधिना नमस्कार प्रदक्षिणम् ॥५२॥
अर्घ्यं दत्वाय पुष्पाणि पादयोस्तु विकीर्य च ।
प्रणिपत्य च देवेशमात्मन्यारोपयेच्छिवम् ॥५३॥
एव सक्षिप्य कथित लिंगार्चनमनुत्तमम्   ।
आभ्यतर प्रवक्ष्यामि लिंगार्चनमिहाद्य ते ॥५४॥

फिर क्रम से गन्ध पुष्प धूप दीप, अन्न, सुगन्धित जल और पुन आचमनीय समर्पित करे ॥४७॥ मुकुट, शुभ छत्र तथा अन्य भूषण एव मुख वासादि द्रव्य प्रणव के द्वारा ही देव को समर्पित करना चाहिए ॥४८। इसके अनन्तर स्फटिक मणि के समान वर्ण वाले, निष्कल, अक्षर, समस्त देवों के कारण स्वरूप सर्व लोकमय, परम और ब्रह्मा रुद्र विष्णु आदि देवों तथा ऋषियों के अगोचर एव वेदों के वेत्ता तथा वेदान्तों के भी शिव अगोचर हैं—ऐसी श्रु ति है। लिङ्ग के मूर्द्धा में इस प्रकार का ही ध्यान करना चाहिए। यह ध्यान के प्रकार का वर्णन किया है। शिव तत्त्व आदि, मध्य और अन्त से रहित है तथा ससार के रोग से मुक्त कराने के लिए भेषज के स्वरूप वाला है, ऐसा ही शिव के लिङ्ग में व्यवस्थित करें। लिङ्ग के मस्तक में प्रणव के द्वारा ही पूजन करे। फिर विधि के साथ स्तोत्र पाठ करे तथा नमस्कार और प्रदक्षिणा करनी चाहिए। अर्घ्य देकर तथा चरणों में पुष्पों का विकरण करके देव को प्रणिपात करते हुए फिर उस शिव तत्त्व को अपने हृदय के कमल में स्थापित करना चाहिए। इस तरह से मैंने यह सर्वोत्तम लिङ्ग के अर्चन का विधान सक्षेप में बता दिया है। अब हृदय

के कमल में किया जाने वाला आभ्यन्त प्रकार लिंगार्चन का बताऊँगा ॥४६॥५०॥५१॥५२॥५३॥५४॥

शिवार्चन तत्व संख्या

आग्नेयं सौरममृत बिंबं भाव्य ततोपरि ।
गुणत्रय च हृदये तथा चात्मत्रय क्रमात् ॥१॥
तस्योपरि महादेव निष्कल सकलाकृतिम् ।
कातार्धारुढदेह च पूजयेद्धयानविद्यया ॥२॥
ततो वहुविधं प्रोक्त चिंत्य तत्रास्ति चेद्यतः ।
चिंतकस्य ततश्चिंता अन्यथा नोपपद्यते ॥३॥
तस्माद्धये यं तथा ध्यानं यजमानः प्रयोजनम् ।
स्मरेत्तत्रान्यथा जातु बुद्धयते पुरुषस्य ह ॥४॥
पुरे शेते पुरं देह तस्मात्पुरुष उच्यते ।
याज्यं यज्ञेन यजते यजमानस्तु स स्मृतः ॥५॥
ध्येयो महेश्वरो ध्यानं चिंतन निवृ त्तिः फलम् ।
प्रधानपुरुषेशानं याथातथ्यं प्रपद्यते ॥६॥
इह षड्विंशको ध्येयो ध्याता वै पञ्चविंशकः ।
चतुर्विंशकमव्यक्त महदाद्यास्तु सप्त च ॥७॥

अब इस अध्याय मे अपने हृदय के कमल मे मनोमयी शिव की मूर्त्ति के अर्चन का विधान बताया जाता है और उसके करने वाली की महिमा तथा तत्वों की सख्या का निरूपण किया जाता है। शैलादि ने कहा—साधक पुरुष को अपने हृदय मे एक कमल स्थित है उसमे आग्नेय, सौर, अमृत बिम्ब की भावना करनी चाहिये। फिर उसके ऊपर गुणत्रय और आत्मत्रय की क्रम से भावना करे। उसके ऊपर परम शुद्ध सम्पूर्ण आकृति वाले तथा कान्ता के द्वारा आधे शरीर पर आरूढ़

वपु वाले शिव का ध्यान की विद्या से अर्चन करे । चिन्तन साधक पुरुष के चिन्तन करने के योग्य बहुत से स्वरूप बताये गए हैं उन सभी स्वरूप को एक ही रूप समझना चाहिए तभी ध्यान करने वाले का चिन्तन ठीक प्रकार से हो सकता है अन्यथा भेद वृद्धि के प्रभाव चिन्तन उत्पन्न नहीं होता है । इसलिए ध्येय, ध्यान, यजमान और प्रयोजन उस शिव के रूप का स्मरण करना चाहिए अन्यथा यहाँ पर जीवात्मा के शरीर में वह साम्ब नाम वाला ब्रह्म किसी भी प्रकार से नहीं जाना जाता है । ॥१॥२॥३॥४॥ पुर यह शरीर है । इस देह के पुर में जो शयन करता है वह इसी कारण से पुरुष कहा जाता है । यज्ञ के द्वारा यजन करने के योग्य का यजन करने से ही यजमान कहा जाया करता है ॥५॥ ध्येय भगवान् महेश्वर हैं, ऐसा जो जानता है वही वस्तुतः शिव को प्राप्त किया करता है । उन महेश्वर का चिन्तन करना ही ध्यान कहा जाता है और निर्वृत्ति का होना ही उस चिन्तन का फल होता है । ऐसा समझने वाला पुरुष प्रधान पुरुष ईशान के याथातथ्य को प्राप्त करता है ॥६॥ अब छब्बीस तत्वों का निरूपण किया जाता है । यहाँ लिंग शरीर में षड्विंशात्मक शिव का ध्यान करना चाहिए । ध्येय षड्दशक है, ध्याता पञ्च विंशक है और अव्यक्त चतुर्विंशक है, तेईस महदादि होते हैं । महदादि सात हैं ॥७॥

महांस्तथा ह्यहंकारं तन्मात्रं पञ्चकं पुनः ।
कर्मेन्द्रियाणि पञ्चैव तथा बुद्धीन्द्रियाणि च ॥८॥
मनश्च पञ्च भूतानि शिवः षड्विंशकस्ततः ।
स एव भर्ता कर्ता च विधेरपि महेश्वरः ॥९॥
हिरण्यगर्भं रुद्रोऽसौ जनयामास शंकरः ।
विश्वाधिकश्च विश्वात्मा विश्वरूप इति स्मृतः ॥१०॥
विना यथा हि पितरं मातरं तनयास्त्विह ।
न जायंते तथा सोमं विना नास्ति जगत्त्रयम् ॥११॥

कर्ता यदि महादेवः परमात्मा महेश्वरः ।
तथा कारयिता चैव कुर्वतोल्पात्मन स्तथा ॥१२॥
नित्यो विशुद्धो बुद्धश्च निष्कलः परमेश्वरः ।
त्वयोक्तो मुक्तिदः किं वा निष्कलश्चेत्करोति किम् ॥१३॥
कालः करोति सकल काल कलयते सदा ।
निष्कल च मनः सर्वं मन्यते सोपि निष्कलः ॥१४॥

महत्तत्व, अहङ्कार और पाँच तन्मात्राएँ इस तरह से ये सात होते हैं। पाँच कर्मेन्द्रियाँ, पाँच ज्ञानेन्द्रियाँ, मन और पाँच महाभूत हैं। इस प्रकार से शिव षड्विंशक होते हैं। वही महेश्वर विधि का भी कर्त्ता तथा भर्त्ता होता है ? ॥८॥९॥ इसी रुद्र शङ्कर ने हिरण्यगर्भ को उत्पन्न किया था। यह हिरण्यगर्भ विश्वाधिक, विश्वात्मा और विश्वरूप कहा गया है ॥१०॥ जिस प्रकार से माता और पिता के बिना ससार मे पुत्र उत्पन्न नही होते हैं। उसी भाँति सोम के बिना इस जगत्त्रय की उत्पत्ति भी नही होती है ॥११॥ सनत्कुमार ने कहा—महेश्वर परमात्मा महादेव यदि सबके कर्त्ता हैं और कराने वाले भी वही हैं तो अल्पात्मा समस्त जीवों के पराधीन होने से ईश्वर मे वैषम्य होने से बन्ध और मोक्ष की व्यवस्था का अभाव होने से महेश्वर मे मुक्ति दातृत्व सम्भव नही होता है। इसलिये महेश्वर को निष्क्रिय, विशुद्ध, बुद्ध, नित्य और परमेश्वर एव मुक्ति का दाता आपने बताया है और वह निष्कल है तो फिर क्या करता है ॥१२॥१३॥ शैलादि ने कहा—महेश्वर तो स्वय निष्कल हैं। सब कुछ काल किया करता है और वह महेश्वर सदा उस काल को प्रेरित करते है। निष्कल मन सब विश्व रूप शिव का साक्षात्कार करता है। इसलिये वह भी निष्कल है ॥१४॥

कर्मणा तस्य चवेह जगत्सर्वं प्रतिष्ठितम् ।
किमत्र देवदेवस्य मूर्त्यष्टकमिद जगत् ॥१५॥

विनाकाशं जगन्नैव विना क्ष्मां वायुना विना ।
तेजसा वारिणा चैव यजमानं तथा विना ॥१६॥
भानुना शशिना लोकस्तस्यैतास्तनवः प्रभोः ।
विचारतस्तु रुद्रस्य स्थूमेतच्चराचरम् ॥१७॥
सूक्ष्म वदंति ऋषयो यन्न वाच्यं द्विजोत्तमाः ।
यतो वाचो निवर्तते अप्राप्य मनसा सह ॥१८॥
आनदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ।
न भेतव्यं तथा तस्माज्ज्ञात्वानंदं पिनाकिनः ॥१९॥
विभूतयश्च रुद्रस्य मत्वा सर्वत्र भावतः ।
सर्वं रुद्र इति प्राहुर्मुनयस्तत्त्वदर्शिनः ॥२०॥
नमस्कारेण सततं गौरवात्परमेष्ठिनः ।
सर्वं तु खल्विदं ब्रह्म सर्वो वै रुद्र ईश्वरः ॥२१॥

उसके कर्म से ही यहाँ समस्त जगत् प्रतिष्ठित है । देवदेव का यह चराचर स्थूल मायिक रूप भगवान् की अष्टमूर्त्ति के स्वरूप वाला है ॥१५॥ आकाश, क्ष्मा, वायु, तेज, जल और यजमान के बिना यह जगत् नहीं होता है ॥१६॥ भानु और चन्द्रमा से लोक होता है । ये सब उस प्रभु के ही तनु है । विचार पूर्वक देखने पर यह चर और अचर भगवान् रुद्र का ही स्वरूप है ॥१७॥ हे द्विजोत्तमो ! ऋषिगण कहते हैं किन्तु जो भगवान् का सूक्ष्म रूप है वह नहीं कहा जा सकने के योग्य होता है । वह ऐसा रूप है कि जहाँ से वाणी मन के साथ निवृत्त हो जाया करती है अर्थात् वाणी और मन की वहाँ तक पहुँच ही नहीं होती है ॥१८॥ ब्रह्मा के आनन्द का विद्वान कहीं भी भय नहीं खाता है उसी प्रकार से पिनाकी के आनन्द का ज्ञान प्राप्त करके भी उससे भय नहीं खाना चाहिए ॥१९॥ भावना से सर्वत्र रुद्र की विभूतियाँ हैं— ऐसा मानकर तत्त्वों के ज्ञाता मुनिगण सब रुद्र स्वरूप ही है, ऐसा कहते हैं ॥२०॥ परमेष्ठी के गौरव से निरन्तर नमस्कार के द्वारा यह निश्चय ही सम्पूर्ण ब्रह्म है और सब ईश्वर रुद्र हैं ॥२१॥

पुरुषो वै महादेवो महेशानः परः शिवः।
एवं विभुर्विनिर्दिष्टो ध्यानं तत्रैव चिंतनम् ॥२२॥
चतुर्व्यूहेण मार्गेण विचार्यालोक्य सुव्रत ।
संसारहेतुः संसारो मोक्षहेतुश्च निवृंतिः ॥२३॥
चतुर्व्यूहः समाख्यातश्चिन्तकस्येह योगिनः।
चिंता बहुविधा ख्याता सैकत्र परमेष्ठिना ॥२४॥
सुनिष्ठेत्यत्र कथिता रुद्रे रौद्री न संशयः।
ऐन्द्री चेन्द्रे तथा सौम्या सोमे नारायणी तथा ॥२५॥
सूर्ये वह्नौ च सर्वेषा सर्वत्रैवं विचारतः।
सैवाहं सोऽहमित्येव द्विधा संस्थाप्य भावतः ॥२६॥
भक्तोऽसौ नास्ति यस्तस्माच्चिता ब्राह्मी न संशय ।
एव ब्रह्ममयं ध्यायेत्पूर्वं विप्र चराचरम् ॥२७॥
चराचरविभागं च त्यजेदभिमतं स्मरन्।
त्याज्य ग्राह्यमलभ्य च कृत्य चाकृत्यमेव च ॥२८॥

महादेव पुरुष हैं और महेशान शिव सबसे पर हैं इस प्रकार से विभु का विभिर्देश किया है। अत. वहाँ पर ही ध्यान और चिन्तन किया जाता है ॥२२॥ हे सुव्रत ! इस चतुर्व्यूह मार्ग के द्वारा विचार करके और भली-भाँति देखकर यही निर्णय होना है कि ससार का हेतु ससार है और मोक्ष का हेतु निवृंति है। चतुर्व्यूह मे, अन्नमय कोश तो स्थूल रूप वाला है इससे उसका त्याग कर देते हैं केवल प्राण, मन विज्ञान आनन्दमय कोश को ग्रहण करते हैं। अथवा ध्येय, ध्यान, यजमान और प्रयोजन रूप हैं ॥२३॥ यहा पर चिन्तन करने वाले योगी का चतुर्व्यूह कहा गया है। एक स्थान पर यह चिन्ता बहुत प्रकार की परमेष्ठी के द्वारा कही गई है ॥२४॥ जन्म-मरण की निवृत्ति कराने वाली होने से यहा पर सुनिष्ठा कही गई है। रुद्र से सम्बद्ध रौद्री होती है, इसमें कोई भी संशय नहीं है। इन्द्र मे ऐन्द्री और सोम तथा नारा-

यण मे सोम्या निष्ठा होती है। इस प्रकार से सूर्य और वह्नि में सर्वत्र सबकी विचार से हुआ करती है कि यह (निष्ठा) ही मैं हूँ या यह मैं हूं, इस प्रकार से भाव से मन को सस्थापित करके दो प्रकार की होती है ॥२५॥२६॥ वह जो भक्त है उसको उस ईश्वर से अन्य नही है इसलिये यह चिन्ता ब्राह्मी है, इसमे कुछ भी संशय नही है। इस प्रकार से हे विप्र ! अर्थात् हे सनत्कुमार ! पहिले इस चराचर को ब्रह्म-मय ही ध्यान करना चाहिए ॥२७॥ अपने अभिमत का स्मरण करते हुए अर्थात् ब्रह्मात्मक शिव के रूप का स्मरण करके चराचर के विभाग को त्याग ही देना चाहिये। जो अकृत्य है वह त्याग करने के योग्य है और अलभ्य कृत्य ग्रहण करने के योग्य है। २८॥

यस्य नास्ति सुतृप्तस्य तस्य ब्राह्मी न चान्यथा।
आभ्यंतरं समाख्यातमेवमभ्यर्चनं क्रमात् ॥२९॥
आभ्यंतरार्चकाः पूज्या नमस्कारादिभिस्तथा।
विरूपा विकृताश्चापि न निंद्या ब्रह्मवादिनः ॥३०॥
आभ्यंतरार्चकाः सर्वे परीक्ष्या विजानता।
निंदका एव दुःखार्ता भविष्यंत्यल्पचेतसः ॥३१॥
यथा दारुवने रुद्रं विनिंद्य मुनयः पुरा।
तस्मात्सेव्या नमस्कार्याः सदा ब्रह्मविदस्तथा ॥३२॥
वर्णाश्रमविनिर्मुक्ता वर्णाश्रमपरायणैः ॥३३॥

जिसको चराचर का विभाग नही होता है उस सुतृप्त को ब्राह्मी होती है अन्यथा नही होती है। इस प्रकार से क्रम से आभ्यन्तर अर्चन कहा गया है ॥२९॥ जो आभ्यन्तर के अर्चन करने वाले हैं वे नमस्कारादि के द्वारा पूज्य होते हैं। ब्रह्मवादी लोग चाहे विरूप और विकृत भी हो तो भी वे निन्दा करने योग्य नही होते हैं ॥३०॥ विशेष रूप से ज्ञान रखने वाले पुरुष को आभ्यन्तर अर्चना करने वाले सबकी परीक्षा नही करनी चाहिये। जो अल्प अर्थात् क्षुद्रचित्त वाले निन्दक

होते है वेही दुःखार्त्त होंगे ॥३१॥ वे इस तरह दुःख से आर्त्त हो जायेंगे जैसे पहिले दारु वन मे, रुद्र की विनिन्दा करके मुनिगण परम दुःखित हुए थे। इससे ब्रह्म ज्ञाता लोग सर्वदा सेव्य और नमस्कार करने के योग्य होते हैं ॥३२॥ वर्णाश्रम परायण साधक वर्णाश्रम से विनिर्मुक्त होते हैं ॥३३॥

सुदर्शन व्याख्यान, क्रम सन्यास लक्षण

इदानी श्रोतुमिच्छामि पुरा दारुवने विभो।
प्रवृत्तं तद्वनस्थानां तपसा भावितात्मनाम् ॥१॥
कथं दारुवनं प्राप्तो भगवान्नीललोहितः।
विकृतं रूपमास्थाय चोर्ध्वरेता दिगंबरः ॥२॥
किं प्रवृत्तं वने तस्मिन् रुद्रस्य परमात्मनः।
वक्तुमर्हसि तत्त्वेन देवदेवस्य चेष्टितम् ॥३॥
तस्य तद्वचनं श्रुत्वा श्रुतिसारविदां वरः।
शिलादसूनुर्भगवान्प्राह किंचिद्ध्रुवं हसन् ॥४॥
मुनयो दारुगहने तपस्तेपुः सुदारुणम् ।
तुष्ट्यर्थं देवदेवस्य सदारतनयाग्नयः ॥५॥
तुष्टो रुद्रो जगन्नाथश्चेकितानो वृषध्वजः ।
धूर्जटिः परमेशानो भगवान्नीललोहितः ॥६॥
प्रवृत्तिलक्षणं ज्ञानं ज्ञातुं दारुवनौकसाम् ।
परीक्षार्थं जगन्नाथः श्रद्धया क्रीडया च सः ॥७॥

सनत्कुमार ने कहा—हे विभो ! पहिले दारुवन मे तप से भावित आत्मा वाले उस वन में निवासियों को जो प्रवृत्त हुआ उसे अब श्रवण करने की मेरी इच्छा होती है ॥१॥ ऊर्ध्व रेता दिगम्बर भगवान् नील-लोहित विकृत रूप में आस्थित होकर दारुवन मे कैसे प्राप्त हुये

थे ? ।।२।। परमात्मा रुद्र भगवान् को उस वन मे क्या प्रवृत्त हुआ था ? उन देवो के देव के चेष्ठित को तात्विक रूप से आप वर्णन करने के योग्य होते हैं ।।३।। सूतजी ने कहा-- उसके उस वचन का श्रवणकर श्रुति के सार के ज्ञाताओ मे श्रेष्ठ शिलाद सूनु भगवान् भव का स्मरण कर कुछ हंसते हुए बोले ।।४।। शैलादि ने कहा—दारुवन मे मुनिगण, सुदागण तपस्या कर रहे थे जो कि अपनी स्त्री, पुत्र और अग्नि के सहित थे और देवो के देव भव की तुष्टि के लिये ही तप कर रहे थे ।।५।। माया के द्वारा अत्यन्त संशय को समुत्पन्न करने वाले, जगत् के नाथ, वृषध्वज, धूर्जटि, परमेशान, भगवान् नील लोहित रुद्र उनकी तपस्या से सतुष्ट हो गये थे ।।६।। किन्तु दारुवन के निवास करने वाले मुनियो के प्रवृत्ति स्वरूप ज्ञ न को जानने के लिये वह जगतो के नाथ श्रद्धा और क्रीडा से परीक्षा करने के हेतु ऐसे विकृत स्वरूप वाले हुए थे ।।७।।

निवृत्तिलक्षणज्ञानप्रतिष्ठार्थं च शङ्करः ।
देवदारुवनस्थानां प्रवृत्तिज्ञानचेतसाम् ।।८।।
विकृतं रूपमास्थाय दिग्वासा विषमेक्षणः ।
मुग्धो द्विहस्तः कृष्णांगो दिव्यं दारुवन ययौ ।।९।।
मंदस्मितं च भगवान् स्त्रीणा मनसिजोद्भवम् ।
भ्रविलास च गान च चकारातीव सुन्दरः ।।१०।।
संप्रेक्ष्य नारीवृंदं गै मुहुर्मुहुरनंगहा ।
अंनगवृद्धिमकरोदतीव मधुराकृतिः ।।११।।
वने त पुरुषं दृष्ट्वा विकृतं नीललोहितम् ।
स्त्रियः पतिव्रताश्चापि तमेवान्वयुरादरात् ।।१२।।
वनोटजद्वारगताश्च नार्यो
विस्रस्तवस्त्राभरणा विचेष्टाः
लब्ध्वा स्मितं तस्य
मुखारविंदाद्द्रुमालयस्थास्तमथान्वयुस्ताः ।।१३।।

दृष्ट्वा काश्चिद्भवं नार्यो मदघूर्णितलोचनाः ।
विलासबाह्यास्ताश्चापि भ्रूविलासं प्रचक्रिरे ॥१४॥

धान अनुमान करते हैं। बालखिल्य मुनिगण उदयाचल से पारिवारित कर रवि को ग्रस्ताचल ले जाते हैं।।६६।। इन देवों का जिस प्रकार का तेज, तप, योग, मन्त्र, धर्म और बल होता है ।।७०।।

तथा तपत्यसौ सूर्यस्तेषामिद्धस्तु तेजसा ।
इत्येते वै वसंतीह द्वौ द्वौ मासौ दिवाकरे ।।७१।।
ऋषयो देवगंधर्वपन्नगाप्सरसां गणाः ।
ग्रामण्यश्च तथा यक्षा यातुधानाश्च मुख्यतः ।।७२।।
एते तपन्ति वर्षंति भांति वांति सृजंति च ।
भूतानामशुभं कर्म व्यपोहन्तीह कीर्तिताः ।।७३।।
मानवानां शुभं ह्येते हरंति च दुरात्मनाम् ।
दुरितं सुप्रचाराणां व्यपोहंति क्वचित् क्वचित् ।।७४।।
विमाने च स्थिता दिव्ये कामगे वातरंहसि ।
एते सहैव सूर्येण भ्रमंति दिवसानुगाः ।।७५।।
वर्षन्तश्च तपंतश्च ह्लादयंतश्च वै द्विजाः ।
गोपायंतीह भूतानि सर्वाणि ह्यामनुक्षयात् ।।७६।।
स्थानाभिमानिनामेतत्स्थानं मन्वन्तरेषु वै ।
अतीतानागतानां वं वर्तते सांप्रतं च ये ।।७७।।

उनके तेज से समिद्ध होकर यह सूर्य वैसा ही तपता है। ये सब दो-दो मास तक दिवाकर में निवास किया करते हैं ।।७१।। ऋषिगण, देव, गन्धर्व पन्नग, अप्सराओं के समूह, ग्रामणी, यक्ष और यातुधान मुख्य रूप से ये सब तपते हैं, बरसते हैं, प्रकाश देते हैं, वहन करते हैं तथा वायु सञ्चार करते हैं और सृजन करते हैं। ये कीर्तित होने पर प्राणियों के अशुभ कर्म का नाश किया करते हैं ।।७२।।७३।। ये मानवों के शुभ कर्म का हरण किया करते हैं और कहीं-कहीं पर सुप्रचार वाले दुरात्माओं के दुरित का नाश करते हैं ।।७४।। इच्छा के अनुसार गमन करने वाले, परम दिव्य तथा वायु के तुल्य वेग वाले वेमान में स्थित ये सब दिवस के अनुगमन करने वाले होते हुए सूर्य

के साथ ही भ्रमण किया करते हैं ॥७५॥ हे द्विजगण ! ये वर्षते हुए, तपते हुए, ह्लादयित होते हुए, इस ससार मे मनु के क्षय पर्यंत समस्त भूतों की रक्षा करते है ॥७६॥ मन्वन्तरो मे यह स्थान स्थानाभिमानियो का है। जो अतीत हो चुके है या आगे आने वाले हैं तथा अब वर्त्तमान हैं ॥७७॥

एते वसति वै ऽसूर्ये सप्तकास्ते चतुर्दश ।
चतुर्दशसु सर्वेषु गणा मन्वन्तरेष्विह ॥७८॥
सक्षेपाद्विस्तराच्चैव यथावृत्त यथाश्रुतम् ।
कथित मुनिशार्दूला देवदेवस्य धीमतः ॥७९॥
एते देवा वसत्यर्के द्वौद्वौ मासौ क्रमेण तु ।
स्थानाभिमानिनो ह्येते गणा द्वादश सप्तका. ॥८०॥
इत्येष एकचक्रेण सूर्यस्तूर्णं रथेन तु ।
हरितैरक्षरैरश्वैः सर्पतेऽसौ दिवाकरः ॥८१॥
अहोरात्र रथेनासावेक चक्रेण तु भ्रमन् ।
सप्तद्वीपसमुद्रा गा सप्तभि. सर्पते दिवि ॥८२॥

ये चतुर्दश सप्तक हैं जो कि सूर्य मे वास करते हैं। यहाँ पर चतुर्दश समस्त मन्वन्तरा म ये गण होते हैं ॥७८॥ हे मुनियो मे शार्दूलो ! सक्षेप से और विस्तार से जैसा भी हुआ और जो भी कुछ श्रवण किया है वह धीमान् देवो के देव का सभी कुछ हाल मैंने कह दिया है ॥७९॥ य देवता दो दो मास पर्यन्त क्रम से सूर्य मे निवास किया करते हैं। ये द्वादश सप्तक गण स्थानाभिमानी होते हैं ॥८०॥ इस प्रकार स यह सूर्यदेव एक पहिए वाले रथ के द्वारा जिस म अक्षर (नाश रहित) हरित अश्व हैं, बड़ी शीघ्रता से दिवाकर गमन किया करता है ॥८१॥ यह सूर्य रातदिन एक चक्र वाले रथ से भ्रमण करता हुआ दिव लोक मे सात अश्वो स सातद्वीप और सात समुद्र वाली भूमि मे तेजी से गमन किया करता है ॥८२॥

सोम के रथ का निरूपण

वीथ्याश्रयाणि चरति नक्षत्राणि निशाकरः ।
त्रिचक्रोभयतोश्वश्च विज्ञेयस्तस्य वै रथः ॥१॥
शतारैश्च त्रिभिश्चक्रैर्युक्तः शुक्लैर्हयोत्तमैः ।
दशभिस्त्वकृशैर्दिव्यैरसंगैस्तैर्मनोजवैः ॥२॥
रथेनानेन देवैश्च पितृभिश्चैव गच्छति ।
सोमो ह्यम्बुमयैर्गोभिः शुक्लैः शुक्लगभस्तिमान् ॥३॥
क्रमते शुक्लपक्षादौ भास्करात्परमास्थितः ।
आपूर्यते परस्यातः सततं दिवसक्रमात् ॥४॥
देवैः पीतं क्षये सोममाप्याययति नित्यशः ।
पीत पञ्चदशाहं तु रश्मिनैकेन भास्करः ॥५॥
आपूरयन् सुषुम्नेन भागंभागमनुक्रमात् ।
इत्येषा सूर्यवीर्येण चन्द्रस्याप्यायिता तनुः ॥६॥
स पौर्णमास्यां दृश्येत शुक्लः संपूर्णमण्डलः ।
एवमाप्यायितं सोमं शुक्लपक्षे दिनक्रमात् ॥७॥

इस अध्याय मे सोम के उत्तम रथ का निरूपण किया जाता है। अमृत कलाओं के पान से उसका ह्रास होता है और सूर्य से इसका पोषण हुआ करता है, इसका वर्णन किया गया है। सूतजी ने कहा—अश्विनी आदि नक्षत्र अपने मार्ग मे गमन करने वाले हैं और चन्द्रमा अनुक्रम से गमन किया करता है। दक्षिण और उत्तर के भाग में इसके अश्व रहा करते हैं ऐसा इस चन्द्र का रथ जानना चाहिए ॥१॥ चन्द्रमा के रथ मे शत अरा हैं और तीन चक्र (पहिए) हैं। उस रथ मे अति श्रेष्ठ और शुक्ल वर्ण के दश अश्व होते हैं जो हृष्ट, पुष्ट, परम दिव्य, असङ्ग और मन के तुल्य वेग वाले होते हैं ॥२॥ इस प्रकार के अति सुन्दर रथ के द्वारा जलमय शुक्ल किरणों से शुक्ल किरणों से शुक्ल गभस्ति (किरण) वाला है ॥३॥ शुक्ल पक्ष के आदि प्रति पक्ष

मे अग्र मार्ग मे आस्थित होता हुआ यह चन्द्रमा क्रमण किया करता है। दिनो के क्रम से निरन्तर शुक्ल पक्ष का अन्त पूर्ण होता है ॥४॥ कृष्ण पक्ष मे पन्द्रह दिन तक अमावस्या पर्यन्त, नित्य देवो के द्वारा पीत पीत सोम क्षय को प्राप्त होता है फिर सुषुम्न नामक एक रश्मि से एक-एक भाग अनुक्रम से आपूरित करता हुआ भास्कर आप्यायित करता है। इस रीति से चन्द्रमा का यह कलेवर सूर्य के वीर्य से आप्यायित हुआ करता है ॥५॥६॥ शुक्ल पक्ष मे दिनो के क्रम से यह सोम ऐसा आप्यायित (सन्तृप्त) हो जाता है कि वह पूर्णमासी मे शुक्ल सम्पूर्ण मण्डल वाला हो जाता है ॥७॥

ततो द्वितीयाप्रभृति वहुलस्य चतुर्दशीम् ।
पिवंत्यम्बुमय देवा मधु सौम्यं सुधामृतम् ॥८॥
सभृत स्वर्धमासेन ह्यमृतं सूर्यतेजसा ।
पानार्थममृत सोम पौर्णमास्यामुपासते ॥९॥
एकरात्रि सुराः सर्वे पितृभिस्त्वृषिभिः सह ।
सोमस्य कृष्णपक्षादौ भास्कराभिमुखस्य च ॥१०॥
प्रक्षीयते परस्यातः पीयमानाः कलाः क्रमात् ।
त्रयस्त्रिशच्छताश्चैव त्रयस्त्रिशत्तथैव च ॥११॥
त्रयस्त्रिशत्सहस्राणि देवा. सोमं पिवति वै ।
एव दिनक्रमात्पीते विवुधैस्तु निशाकरे ॥१२॥
पीत्वार्धमास गच्छन्ति अमावास्या सुरोत्तमाः ।
पितरश्चोपतिष्ठति अमावास्या निशाकरम् ॥१३॥
ततः पंचदशे भागे किंचिच्छिष्टे कलात्मके ।
अपराह्णे पितृगणा जघन्य पर्युपासते ॥१४॥

पुनः कृष्ण पक्ष मे प्रतिपदा से लेकर चतुर्दशी तक चन्द्र सम्बन्धी मधुर जलमय अतिस्वच्छ अमृत को इन्द्रादि देव पान किया करते हैं ॥८॥ सूर्य के तेज से आधे मास मे सभृत (परिपूर्ण) अमृत होता

है। उस अमृत स्वरूप सोम को पान करने के लिये पूर्णमासी की एक ही रात्रि मे इन्द्र आदि देवगण पितरो और ऋषियो के साथ सेवन किया करते हैं जो कि कृष्ण पक्ष के आदि मे सोम भास्कर के अभिमुख रहता है ॥९॥१०॥ शुक्ल पक्ष के अन्त मे पीयमान (पीत हुई) कलायें क्रम से क्षीण हो जाया करती हैं, जो कि तेतीससौ तेतीस होती हैं ॥११॥ देवो के पुत्र एव पौत्र स्वरूप मे रहने वाले तेतीस सहस्र देव गण सोम का पान किया करते हैं। इस प्रकार से देवो के द्वारा निशाकर का पान करने लेने पर फिर वे सुरश्रेष्ठ आधे मास तक पान करके अमावस्या मे चले जाते हैं। अमावस्या मे पितृगण निशाकर के समीप उपस्थित हो जाया करते हैं ॥१२॥१३॥ इस के अनन्तर पन्द्रहवें भाग मे कलात्मक के कुछ शेष रहने पर अपराह्ण में पितर उस जघन्य की पर्युपासना किया करते हैं ॥१४॥

पिबति द्विकल काल शिष्टा तस्य कला तु या ।
निस्सृत तदमावास्या गभस्तिभ्यः स्वधामृतम् ॥१५॥
मासतृप्तिमवाप्याग्रचा पीत्वा गच्छति तेऽमृतम् ।
पितृभि पीयमानस्य पचदश्या कला तु या ॥१६॥
यावत् क्षीयते तस्य भाग: पञ्चदशस्तु स: ।
अमावास्या ततस्तस्या अतरा पूर्यते पुन: ॥१७॥
वृद्धिक्षयौ वै पक्षादौ षोडश्या शशिन स्मृतौ ।
एव सूर्यनिमित्तैषा पक्षवृद्धिर्निशाकरे ॥१८॥

उसकी जो कला शेष रहती है उसको दो घडी के समय तक पान किया करते हैं। वह स्वधामृत अमावस्या मे उसकी गभस्तियो (किरणो) से नि सृत हुआ करता है। ॥१५॥ वे अमृत का पान करके पूर्णमास की तृप्ति को प्राप्त करते हैं। पञ्चदशी मे पितृगणो के द्वारा पीयमान की जो कला है जब तक उसका पन्द्रहवाँ भाग क्षीण होता है फिर अमावस्या के मध्य में पूर्णमासी में वह पूर्ण हो जाया करता है।

॥१६॥१७॥ पक्ष के आदि मे प्रतिपदा मे चन्द्रमा के वृद्धि और क्षय चहे गये चन्द्रमा मे यह पक्ष वृद्धि सूर्य के ही निमित्त वाली हुआ करती है ॥१८॥

ज्योतिश्चक्रे ग्रहचार कथनं

अष्टभिश्च हयैर्युक्तः सोमपुत्रस्य वै रथः।
वारितेजोमयश्चाथ पिशङ्गैश्चैव शोभनैः ॥१॥
दशभिश्चाकृशैरश्वैर्नानावर्णै रथः स्मृतः।
शुक्रस्य क्ष्मामयैर्युक्तो दैत्याचार्यस्य धीमतः ॥२॥
अष्टाश्वश्चाथ भौमस्य रथो हैम. सुशोभनः।
जीवस्य हैमश्चाष्टाश्वो मरस्यायसनिर्मितः ॥३॥
रथ आपोमयरश्वैर्दशभिस्तु सितेतरै।
स्वर्भानोर्भास्करारेश्च तथा चाष्टहयः स्मृतः ॥४॥
सर्वे ध्रुवनिबद्धा वै ग्रहास्ते वातरश्मिभिः।
एतेन भ्राम्यमाणाश्च यथायोगं व्रजन्ति वै ॥५॥
यावत्यश्चैव ताराश्च तावन्तश्चैव रश्मय.।
सर्वे ध्रुवनिबद्धाश्च भ्रमन्तो भ्रामयन्ति तम् ॥६॥
अलातचक्रवद्याति वातचक्रेरितानि तु।
यस्माद्वहति ज्योतीषि प्रवहस्तेन स स्मृतः ॥७॥

इस अध्याय मे बुध आदि के पृथक रथ, ग्रह मण्डलो के नाम और उनकी गतियो का कीर्तन किया गया है। सूत जी ने कहा–चन्द्रमा के पुत्र बुध का रथ आठ घोडो से युक्त होता है। यह रथ जल और तेज से पूर्ण होता है और इसके अश्व पिशङ्ग वर्ण वाले, अकृश, नाना वर्ण वाले, शोभन और संख्या मे दश होते हैं। दैत्यो के आचार्य परम

बुद्धिमान् शुक्र का रथ पार्थिव अश्वों से युक्त होता है ॥१॥२॥ मङ्गल जो भूमि का पुत्र है। इसीलिये इसका नाम भौम होता है। इसका रथ आठ अश्वों वाला, अत्यन्त शोभा से युक्त और सुवर्ण का है। गुरु (बृहस्पति) का रथ भी आठ अश्वो वाला होता है। शनि जिसकी गति बहुत धीमी होती है अतएव इसका नाम मन्द होता है। इसका रथ लोहे का निर्मित हुआ है। इसका रथ कृष्ण वर्ण वाले जलमय दश अश्वो से युक्त होता हैं। सूर्य के शत्रु स्वर्भानु का रथ आठ अश्वो से युक्त होता है ॥३॥४। ये समस्त ग्रह ध्रुव से वात रूपी रश्मियो के द्वारा निबद्ध होते हैं। इसके द्वारा ये भ्राम्यमाण होते हुए यथायोग चला करते हैं ॥५॥ जितने तारा हैं उतनी रश्मियाँ होती हैं। ये सभी ध्रुव के साथ निबद्ध हैं। ये भ्रमण करते हुए उसको भ्रमण कराते हैं ॥६॥ ये वायु के चक्र से प्रेरित होते हुए अलात (जलती हुई लकडी) के चक्र की भाँति चला करते हैं। जिस कारण से ये ज्योतियाँ बहती हैं इसीसे वह प्रवह कहा गया है ॥७॥

नक्षत्रसूर्याश्च तथा ग्रहतारागणैः सह।
उन्मुखाभिमुखाः सर्वे चक्रभूताः श्रिता दिवि ॥८॥
ध्रुवेणाधिष्ठिताश्चैव ध्रुवमेव प्रदक्षिणम्।
प्रयाति चेश्वर द्रष्टुं मेढीभूतं ध्रुव दिवि ॥९॥
नवयोजनसाहस्रो विष्कभः सवितुः स्मृत।
त्रिगुणस्तस्य विस्तारो मण्डलस्य प्रमाणतः ॥१०॥
द्विगुणः सूर्यविस्ताराद्विस्तारः शशिनः स्मृत.।
तुल्यस्तयोस्तु स्वर्भानुर्भूत्वाधस्तात्प्रसर्पति ॥११॥
उद्धृत्य पृथिवीछाया निर्मिता मंडलाकृतिम्।
स्वर्भानोस्तु वृहत्स्थानं तृतीय यत्तमोमयम् ॥१२॥
चन्द्रस्य षोडशो भागो भार्गवस्य विधीयते।
विष्कभान्मडलाच्चैव योजनाच्च प्रमाणतः ॥१३॥

भार्गवात्पादहीनस्तु विज्ञेयो वै बृहस्पतिः ।
पादहीनौ वक्रसौरी तथाऽऽयामप्रमाणत. ॥१४॥

सूर्य और नक्षत्र समस्त तारा गणों के सहित उन्मुख और अभिमुख होते हुए अन्तरिक्ष मे सब चक्र भूत होकर अर्थात् एक वर्त्तुल आकार मे रहने वाले होकर आश्रित हैं ॥८॥ ये सब ध्रुव के द्वारा अधिष्ठित होते हुए ध्रुव की ही प्रदक्षिणा कर दिवि लोक मे मेढीभूत स्वामी ध्रुव को देखने के लिये जाया करते हैं अर्थात् घूमा करते हैं । ॥९॥ सूर्य का मध्य भाग नौ हजार योजन वाला कहा गया है । मण्डल के प्रमाण से उसका विस्तार तिगुना बताया गया है ॥१०॥ सूर्य के विस्तार से दुगुना चन्द्र का विस्तार बताया गया है । इन दोनों के विस्तार के समान ही स्वर्भानु है जो नीचे होकर प्रसर्पण किया करता है ॥११॥ मण्डल की आकृति वाली विरचित पृथिवी की छाया को लेकर स्वर्भानु का तीसरा तम पूर्ण वृहत् स्थान होता है ॥१२॥ चन्द्रमा का सोलहवाँ भाग भार्गव का मध्य से, मण्डल से, योजन से और प्रमाण से होता है ॥१३॥ भार्गव (शुक्र) से आयाम और प्रमाण मे बृहस्पति पाद हीन होता है । उसी भाँति बृहस्पति से आयाम और प्रमाण से भौम और सूर्य का पुत्र शनि ये दोनों भी पाद हीन अर्थात् चतुर्थ भाग कम होते हैं ॥१४॥

विस्तारान्मण्डलाच्चैव पादहीनस्तयोर्बुधः ।
तारा नक्षत्ररूपाणि वपुष्मन्तीह यानि वै ॥१५॥
बुधेन तानि तुल्यानि विस्तारान्मण्डलादपि ।
प्रायशश्च द्वयोर्गीनि विद्यादृक्षाणि तत्त्ववित् ॥१६॥
तारानक्षत्ररूपाणि हीनानि तु परस्परम् ।
शतानि पञ्च चत्वारि त्रीणि द्वे चैव याजने ॥१७॥
सर्वोपरि निकृष्टानि तारकामण्डलानि तु ।
योजनद्वयमात्राणि तेभ्यो ह्रस्वं न विद्यते ॥१८॥

उपरिष्टात्त्रयस्तेषां ग्रहा ये दूरसर्पिणः।
सौरोङ्गिराश्च वक्रश्च ज्ञेया मंदविचारिणः ॥१६॥
तेभ्योधस्तात्तु चत्वारः पुनरन्ये महाग्रहाः।
सूर्यः सोमो बुधश्चैव भार्गवश्चैव शीघ्रगाः ॥२०॥
तावंत्यस्तारकाः कोट्यो यावंत्यृक्षाणि सर्वशः।
ध्रुवात्तु नियमाच्चैषामृक्षमार्गे व्यवस्थितिः ॥२१॥

इन दोनों भौम और शनि से विस्तार और मडन की दृष्टि से बुध पादहीन होता है। वपु वाले चन्द्र योगी अश्विनी आदि नक्षत्र जो भी हैं वे सब बुध से विस्तार और मडल मे प्रायः तत्त्व वेत्ता को समान ही जानने चाहिये ॥१५॥१६॥ परस्पर मे होन ये सैकड़ो तारा नक्षत्र रूप वाले पांच, चार, तीन और दो योजन हुआ करते हैं ॥१७॥ सबसे ऊपर निकृष्ट तारा मडल दो योजन मात्र ही होते हैं और इनसे छोटे नही हुआ करते हैं ॥१८॥ इनसे ऊपर के भाग में दूर मे सर्पण (गमन) करने वाले तथा मन्दगति से चलने वाले शनि, अङ्गिरा और भौम ये तीन ग्रह ही होते है ॥१६॥ उनसे नीचे के भाग मे चार अन्य महाग्रह होते हैं जिनके नाम सूर्य, सोम, बुध और भार्गव (शुक्र) हैं। ये शीघ्र गमन करने वाले भी होते हैं ॥२०॥ जितने करोड नक्षत्र है उतने ही सूक्ष्म तारका हैं। इन नक्षत्रो के ऋक्ष मार्ग मे अवस्थिति निश्चल होती है ॥२१॥

सप्ताश्वस्यैव सूर्यस्य नीचोच्चत्वमनुक्रमात्।
उत्तरायणमार्गस्थो यदा पर्वसु चन्द्रमाः ॥२२॥
उच्चत्वाद्दृश्यते शीघ्रं नातिव्यक्तैर्गभस्तिभिः।
तदा दक्षिणमार्गस्थो नीचां वीथिमुपाश्रितः ॥२३॥
भूमिरेखावृतः सूर्यः पौर्णिमावास्ययोस्तदा।
ददर्श च यथाकालं शीघ्रमस्तमुपैति च ॥२४॥
तस्मादुत्तरमार्गस्थो ह्यमावास्यां निशाकरः।
ददृशे दक्षिणे मार्गे नियमाद्दृश्यते न च ॥२५॥

ज्योतिषां गतियोगेन सूर्यस्य तमसा वृत्तः ।
समानकालास्तमयौ विषुवत्सु समोदयौ ॥२६॥
उत्तरासु च वीथीषु व्यंतरास्तमनोदयौ ।
पौर्णिमावास्ययोर्ज्ञेयौ ज्योतिश्चक्रानुवर्तिनौ ॥२७॥
दक्षिणायनमार्गस्थो यदा चरति रश्मिवान् ।
ग्रहाणां चैव सर्वेषा सूर्योधस्तात्प्रसर्पति ॥२८॥

सात अश्वो वाले सूर्य के ही अनुक्रम से नीच और उच्च वर्त्ती होना जानना चाहिये । जब उत्तरायण मार्ग मे स्थित रहने वाला चन्द्रमा पर्वो (पौर्ण मासियो) मे उच्च होने से शीघ्र ही दिखलाई दिया करता है जिसकी किरणें अत्यन्त व्यक्त नही होती हैं । उस समय मे जब कि दक्षिणायन मे स्थित नीच वीथि का उपाश्रय लेने वाला सूर्य होता है तो पूर्णमासी और अमावस्या मे भूमि रेखावृत दिखाई देता है और यथा समय शीघ्र ही ग्रस्त हो जाया करता है ॥२२॥२३॥२४॥ अमावस्या मे उत्तम मार्ग मे स्थित निशाकर दिखाई दिया करता है । दक्षिण मार्ग मे सूर्य की ज्योतियो के गति-योग से अन्धकारावृत होता हुआ नियम से नही दिखलाई देता है । विषुवत् अर्थात् मेष की सङ्क्रान्ति के दिनो मे सूर्य और चन्द्र ये दोनो समान काल मे ग्रस्त और उदय वाले होते हैं ॥२५॥२६॥ उत्तर वीथियो मे जबकि विषम काल में इनका उदय और अस्तमन होता है तब पूर्णिमासी और अमावस्या इन दोनो मे इनको ज्योतिश्चक्र के अनुवर्त्ती जानना चाहिए ॥२७॥ जिस समय मे सूर्य दक्षिणायन मार्ग मे अवस्थित होता है और गमन किया करता है तब समस्त ग्रहो के नीचे भाग में ही सूर्य प्रसर्पण किया करता है ॥२८॥

विस्तीर्ण मंडलं कृत्वा तस्योर्ध्वं चरते शशी ।
नक्षत्रमंडल कृत्स्नं सोमादूर्ध्वं प्रसर्पति ॥२९॥
नक्षत्रेभ्यो बुधश्चोर्ध्वं बुधादूर्ध्वं तु भार्गवः ।
वक्रस्तुः भार्गवादूर्ध्वं वक्रादूर्ध्वं बृहस्पतिः ॥३०॥

प्रजापतीनां दक्षं च मरुतां शक्रमेव च ।
दैत्यानां दानवानां च प्रह्लाद दैत्यपुंगवम् ॥४॥
धर्मं पितृणामधिपं निर्ऋतिं पिशिताशिनाम् ।
रुद्रं पशूनां भूताना नंदिनां गणनायकम् ॥५॥
वीराणां वीरभद्रं च पिशाचाना भयंकरम् ।
मातृणां चैव चामुण्डां सर्वदेवनमस्कृताम् ॥६॥
रुद्राणां देवदेवेशं नीललोहितमीश्वरम् ।
विघ्नानां व्योमजं देवं गजास्य तु विनायकम् ॥७॥

ऋषियों ने कहा—सबकी आत्मा प्रजापति ब्रह्मा ने देव और दैत्यों मे प्रमुख सबको किस प्रकार से अभिषिक्त किया था, यह अब आप हमको बताइये ॥१॥ सूतजी ने कहा— प्रजापति ब्रह्मा भगवान् ने ग्रहों के स्वामित्व के पद पर दिवाकर को अभिषिक्त किया था तथा ऋक्षों के और ओषधियों के आधिपत्य पर सोम को अभिषिक्त किया था ॥२॥ जलों के स्वामी के पद पर वरुण को, धनों के आधिपत्य पर कुबेर को, आदित्यों का स्वामी विष्णु को और वसुओं के आधिपत्य पर पावक को अभिषिक्त किया था ॥३॥ प्रजापतियों का स्वामी दक्ष को और मरुतों का अधिपति इन्द्र को तथा दैत्यों और दानवों का स्वामी दैत्यों मे परम श्रेष्ठ प्रह्लाद को अभिषिक्त किया था ॥४॥ पितृगणों का अधिप धर्मराज को और मासाशियों का स्वामी निर्ऋति को एवं पशुओं का रुद्र और भूतों एवं नन्दियों का स्वामी गणनायक शैलादिक को बनाया था ॥५॥ वीरों का स्वामी वीर भद्र को तथा पिशाचों का भयङ्कर एवं माताओं का आधिपत्य समस्त देवों के द्वारा नमस्कृत चामुण्डा को अभिषिक्त किया था ॥६॥ रुद्रों का अधिपति देवदेवेश नील लोहित ईश्वर को और विघ्नों का स्वामी शिव के आत्मज गज के समान मुख वाले विनायक गणेश को अभिषिक्त किया था ॥७॥

स्त्रीणां देवीमुमादेवी वचसां च सरस्वतीम् ।
विष्णुं मायाविना चैव स्वात्मानं जगता तथा ॥८॥

हिमवंतं गिरीणां तु नदीनां चैव जाह्नवीम् ।
समुद्राणां च सर्वेषामधिपं पयसां निधिम् ॥९॥
वृक्षाणां चैव चाश्वत्थं प्लक्षं च प्रपितामहः ॥१०॥
गंधर्वविद्याधरकिन्नराणामीशं पुनश्चित्ररथं चकार ।
नागाधिपं वासुकिमुग्रवीर्यं सर्पाधिपं तक्षकमुग्रवीर्यम् ॥११॥
दिग्वारणानामधिपं चकार गजेन्द्रमैरावतमुग्रवीर्यम् ।
सुपर्णमीशं पततामथाश्वराजानमुच्चैः श्रवसं चकार ॥१२॥
सिंह मृगाणां वृषभं गवां च
मृगाधिपानां शरभं चकार ।
सेनाधिपानां गुहमप्रमेयं
श्रुतिस्मृतीनां लकुलीशमीशम् ॥१३॥
अभ्यर्षिचत्सुधर्माणं तथा शखपद दिशाम् ।
केतुमंतं क्रमेणैव हेमरोमाणमेव च ॥१४॥

स्त्रियों की स्वामिनी उमादेवी और वाणियों की अधिप सरस्वती तथा मायावियों का अधिपति विष्णु को और जगतों का स्वामी अपने आपको (ब्रह्मा को) अभिषिक्त किया था ॥८॥ पर्वतों का अधिपति हिमालय को बनाया था और नदियों के आधिपत्य पर गङ्गा को अभिषिक्त किया था। समस्त समुद्रों का स्वामी पयोनिधि को बनाया था। ॥९॥ सब वृक्षों के आधिपत्य पद पर पीपल के वृक्ष को प्रपितामह ने अभिषिक्त किया था ॥१०॥ गन्धर्व, विद्याधर और किन्नरों का अधिपति चित्ररथ को बनाया था। नागों का स्वामी उग्रवीर्य वाले वासुकि को तथा सर्पों के अधिपति उग्रवीर्य वाले तक्षक को बनाया था ॥११॥ दिशाओं में स्थित गजों के स्वामी अति उग्र वीर्य वाले गजेन्द्र ऐरावत को बनाया था तथा पक्षियों का अधिपति सुपर्ण को और अश्वों का स्वामी उच्चैः श्रवा अश्व को अभिषिक्त किया था ॥१२॥ मृगों का अधिप सिंह को, गौओं का स्वामी वृषभ को और मृगाधिपों का अधिप शरभ को बनाया था। सेनाधिपों का स्वामी अप्रमेय स्कन्द को और श्रुतियों तथा

स्मृतियों का स्वामी लकुलीश नामधारी शिव के अवतारी को बनाया था ॥१३॥ दिशाओं के स्वामी सुधर्मा तथा शङ्खपद, केतुमान् एवं क्रम से हेमरोमा को अभिषिक्त किया था ॥१४॥

पृथिव्या पृथुमीशान सर्वेषा तु महेश्वरम् ।
चतुर्मूर्तिषु सर्वज्ञं शङ्कर वृषभध्वजम् · ॥१५॥
प्रसादाद्भगवाञ्छम्भोश्चाम्यषिचद्यथाक्रमम् ।
पुराभिषिच्य पुण्यात्मा रराज भुवनेश्वरः ॥१६॥
एतद्वो विस्तरेणैव कथित मुनिपुंगवा. ।
अभिषिक्तास्ततस्त्वेते विशिष्टा विश्वयोनिना ॥१७॥

पृथ्वी मे पृथु को और समस्त वस्तुओं का महेश्वर को जो विश्व प्राज्ञ तैजस तुरीय रूप वाली चार प्रकार की मूर्तियों मे सुख कारक और सर्व विषयक ज्ञान से विशिष्ट तथा धर्म की ध्वजा वाले हैं भगवान ने शम्भु के प्रसाद से यथाक्रम अभिषिक्त किया था । पहिले अभिषिक्त करके फिर पुण्यात्मा भुवनों के ईश्वर दीप्तिमान् हुए तथा शोभित हुए थे ॥१५॥१६॥ हे मुनियों मे श्रेष्ठतमो ! विश्व की योनि ब्रह्मा ने ये सब श्रेष्ठ अभिषिक्त किये थे । मैंने यह सब विस्तार के साथ आप लोगों के सामने बता दिया है ॥१७॥

सूर्यरश्मि स्वरूप कथनं

एतच्छ्रुत्वा तु मुनय. पुनस्त सशयान्विता. ।
पप्रच्छुरुत्तर भूयस्तदा ते रोमहर्षणम् ॥१॥
यदेतदुक्त भवता सूतेह वदता वर ।
एतद्विस्तरतो ब्रूहि ज्योतिषा च विनिर्णयम् ॥२॥
श्रुत्वा तु वचन तेषा तदा सूतः समाहितः ।
उवाच परमं वाक्य तेषा संशयनिर्णये ॥३॥

अस्मिन्नर्थे महाप्राज्ञैर्यदुक्तं शांतबुद्धिभिः ।
एतद्वोहं प्रवक्ष्यामि सूर्यचन्द्रमसोर्गतिम् ॥४॥
यथा देवगृहाणीह सूर्यचंद्रादयो ग्रहाः ।
अतः परं तु त्रिविधमग्नेर्वक्ष्ये समुद्भवम् ॥५॥
दिव्यस्य भौतिक स्याग्नेरथोग्नेः पार्थिवस्य च ।
व्युष्टायां तु रजन्यां च ब्रह्मणोऽव्यक्तजन्मनः ॥६॥
अव्याकृतमिद त्वासीन्नैशेन तमसा वृतम् ।
चतुर्भागा वशिष्टेऽस्मिन् लोके नष्टे विशेषतः ॥७॥

इस अध्याय मे तीन प्रकार की वह्नि का निरूपण किया जाता है तथा सूर्य की सहस्र रश्मियो कार्य और सख्या बताई जाती है। सूतजी ने कहा—यह श्रवण करके सशय से युक्त उन मुनियो ने उन रोम हर्षण से उस समय मे पुनः उत्तर पूछा था ॥१॥ ऋषियो ने कहा—हे प्रवचन करने वालो मे परम श्रेष्ठ ! हे सूत ! यहाँ आपने जो यह सब कुछ कहा है इस ज्योतियो के विशेष निर्णय को फिर विस्तार पूर्वक बताइये ॥२॥ सूतजी ने उनके इस वचन को सुना और उस समय में समाहित हुए थे। उनके सशय का विशेष निर्णय करने के लिए परम श्रेष्ठ वाक्य बोले ॥३॥ सूतजी ने कहा कि इस विषय मे शान्त बुद्धि वाले महा मनीषियो ने जो कुछ भी कहा है वही मैं आपको सूर्य और चन्द्रमा की गति बतलाऊँगा ॥४॥ सूर्य, चन्द्र आदि ग्रह उसी प्रकार से हैं जिस प्रकार से यहाँ देवो के स्थान होते हैं। इससे आगे मैं तीन प्रकार की अग्नि उत्पत्ति बताऊँगा ॥५॥ यह अग्नि तीन प्रकार की होती है, एक दिव्य अग्नि है, दूसरी भौतिक अग्नि है और तीसरी पार्थिव अग्नि होती है। अव्यक्त जन्म वाले ब्रह्मा की रात्रि जिस समय मे समाप्त प्राय थी उस समय मे यह ब्रह्माण्ड अस्पष्ट था और निशा के अन्धकार से आवृत था। विशेष रूप से इस लोक के नष्ट होने पर जबकि केवल चतुर्भाग ही इसका अवशिष्ट रह गया था ॥६॥७॥

स्वयंभूर्भगवांस्तत्र लोकसर्वार्थसाधकः ।
खद्योतवत्स व्यचरदाविर्भावचिकीर्षया ॥८॥
सोऽग्नि सृष्ट्वाथ लोकादौ पृथिवीजलसंश्रितः ।
संहृत्य तत्प्रकाशार्थं त्रिधा व्यभजदीश्वरः ॥९॥
पवनो यस्तु लोकेऽस्मिन्पार्थिवो वह्निरुच्यते ।
यश्चासौ तपते सूर्ये शुचिरग्निस्तु स स्मृत. ॥१०॥
वैद्युतोऽब्जस्तु विज्ञेयस्तेषां वक्ष्ये तु लक्षणम् ।
वैद्युतो जाठरः सौरो वारिगर्भास्त्रयोऽग्नयः ॥११॥
तस्मादप. पिबन्सूर्यो गोभिर्दीप्यत्यसौ विभुः ।
जले चाब्जः समाविष्टो नाद्भिरग्निः प्रशाम्यति ॥१२॥
मानवानां च कुक्षिस्थो नाग्निः शाम्यति पावकः ।
अर्चिष्मान्पवनः सोऽग्निर्निष्प्रभो जाठरः स्मृतः ॥१३॥
यश्चायं मडलो शुक्ली निरूष्मा सप्रजायते ।
प्रभा सौरी तु पादेन ह्यस्तं याते दिवाकरे ॥१४॥

लोको के सम्पूर्ण अर्थों के साधक भगवान् स्वयम्भू वहाँ पर आविर्भाव अर्थात् जगत् के सृजन के करने की इच्छा से खद्योत की भाँति विचरण कर रहे थे ॥८॥ इसके अनन्तर लोक के आदि में पृथ्वी और जल मे सश्रित उसने अग्नि का सृजन किया था फिर उसका सहरण करके ईश्वर ने उसके प्रकाश के लिये तीन प्रकार से अर्थात् तीन तरह की अग्नि विभक्त किया था ॥९॥ इस लोक मे जो पवन है वह पार्थिव वह्नि कहा जाता है । और जो यह सूर्य तपता है वह शुचि अग्नि कहा गया है ॥१०॥ जल से उत्पन्न होने वाला वैद्युत अग्नि जानना चाहिये अब उनके लक्षण बताता हूँ। वैद्युत अग्नि जाठर, सौर और वारिगर्भ इस तरह तीन हैं ॥११॥ इससे यह विभु सूर्य किरणों के द्वारा जलो का पान करता हुआ दिप्यमान होता है । जल से उत्पन्न अब्ज जल मे ही समाविष्ट (प्रवेश किया हुआ) रहता है और वह जल से प्रशान्त नहीं होता है ॥१२॥ मनुष्यों की कुक्षि (उदर) मे

अवस्थित अग्नि पावक कभी प्रशान्त नहीं हुआ करता है। वह अचिष्मान् पार्थिव अग्नि प्रभा से रहित होता है और जाठर कहा गया है ॥१३॥ जो यह अग्नि है वह मण्डली, शुक्ली और ऊष्मा से रहित ही उत्पन्न हुआ करता है। दिवाकर के अस्त हो जाने पर सौरी प्रभा एक पाद रह जाती है ॥१४॥

अग्निमाविशते रात्रौ तस्माद्दूरात्प्रकाशते ।
उद्यंत च पुनः सूर्यमौष्ण्यमग्नेः समाविशेत् ॥१५॥
पादेन पार्थिवस्याग्नेस्तस्मादग्निस्तपत्यसौ ।
प्रकाशोष्णस्वरूपे च सौराग्नेये तु तेजसी ॥१६॥
परस्परानुप्रवेशादाप्यायेते परस्परम् ।
उत्तरे चैव भूम्यर्धे तथा ह्यग्निश्च दक्षिणे ॥१७॥
उत्तिष्ठति पुनः सूर्यः पुनर्वै प्रविशत्यपः ।
तस्मात्ताम्रा भवत्यापो दिवारात्रिप्रवेशनात् ॥१८॥
अस्त याति पुनः सूर्यो अहर्वै प्रविशत्यपः ।
तस्मान्नवतं पुन. शुक्ला आपो दृश्यति भास्वराः ॥१६॥
एतेन क्रमयोगेन भूम्यर्धे दक्षिणोत्तरे ।
उदयास्तमने नित्यमहोरात्र विशत्यपः ॥२०॥
यश्चासौ तपते सूर्यः पिबन्नंभो गभस्तिभि ।
पार्थिवाग्निविमिश्रोऽसौ दिव्यः शुचिरिति स्मृतः ॥२१॥

रात्रि मे वह अग्नि मे प्राविष्ट हो जाया करती है इसलिए दूर से प्रकाश दिया करती है। जब फिर सूर्य उदित होता है तो अग्नि की उष्णता सूर्य मे समाविष्ट हो जाती है ॥१५॥ इसमें पार्थिव अग्नि के पाद से यह अग्नि तपता है। सौर अग्नि के तेज प्रकाश और उष्ण स्वरूप वाले हैं ॥१६॥ ये दोनो परस्पर मे अनुप्रवेश से अन्योन्य को आप्यायित करते हैं। भूमि के अर्ध भाग उत्तर मे तथा दक्षिण मे अग्नि रहता है ॥१७॥ सूर्य पुनः उठता है अर्थात् उदित होता है और पुनः जल में प्रवेश कर जाता है। इस कारण से दिन और रात्रि मे प्रवेश न

होने से जल ताम्र वर्ण वाले हो जाया करते हैं ॥१८॥ सूर्य पुन अस्ताचल को गमन करता है। यह जल मे प्रवेश कर जाता है। इसी कारण से रात्रि मे जल शुक्ल वर्ण वाले तथा भास्वर दिखाई दिया करते है। ॥१९॥ इस क्रम के योग से भूमि के दक्षिणोत्तर अर्ध भाग मे उदय एव अस्तमन नित्य होते हैं और अहोरात्र जल मे प्रवेश किया करते हैं ॥२०॥ जो यह सूर्य अपनी गभस्तियो (किरणो) से जल को पीता हुआ तपता रहता है यह पार्थिवाग्नि से विभिन्न दिव्य शुचि कहा गया है ॥२१॥

सहस्रपादसौ वह्निर्वृत्तकुम्भनिभः स्मृतः ।
आदत्ते स तु नाडीना सहस्रेण समततः ॥२२॥
नादेयीश्चैव सामुद्रीः कूपाश्चैव तथा घनाः ।
स्थावरा जगमाश्चैव वापीकुल्यादिका अपः ॥२३॥
तस्य रश्मिसहस्रं तच्छीतवर्षोष्ण निस्स्रवम् ।
तासा चतु शता नाड्यो वर्षते चित्रमूर्तयः ॥२४॥
भजनाश्चैव माल्याश्च केतनाः पतनास्तथा ।
अमृता नामतः सर्वा रश्मयो वृष्टिसर्जनाः ॥२५॥
हिमोद्वहाश्च ता नाड्यो रश्मयस्त्रिशताः पुन ।
रेशा मेघाश्च वात्स्याश्च ह्लादिन्यो हिमसर्जना- ॥२६॥
चन्द्रभा नामतः सर्वाः पीताभाश्च गभस्तयः ।
शुक्लाश्च ककुभाश्चैव गावो विश्वभृतस्तथा ॥२७॥
शुक्लास्ता नामतः सर्वास्त्रिशतीर्घर्मसर्जनाः ।
सोमो बिभर्ति ताभिस्तु मनुष्यपितृदेवताः ॥२८॥
मनुष्यानौषधेनेह स्वधया च पितृनपि ।
अमृतेन सुरान्सर्वांस्तिसृभिस्तर्पयत्यसौ ॥२९॥

सहस्र पाद यह वह्नि वृत्त कुम्भ के तुल्य होता है, ऐसा बताया गया है। वह चारो ओर से एक सहस्र नाडियो से ग्रहण किया करता है ॥२२॥ जल नादेयी, सामुद्री, कूप, घन और वापी कुल्या आदि स्थावर

और जङ्गम होते हैं ॥२३॥ उसकी एक सहस्र रश्मियाँ हैं जो शीत, उष्ण और वर्षा के निस्त्रव हैं। उनमें चार सौ चित्रमूर्ति नाडियाँ वर्षा किया करती हैं ॥२४॥ भजना, माल्या, केतना, पतना तथा अमृता नाम वाली सम्पूर्ण रश्मियाँ वृष्टि के सर्जन करने वाली होती हैं ॥२५॥ हिम के उद्वहन करने वाली जो नाडियां हैं वे तीन सौ रश्मियाँ होती हैं जिनके नाम रेशा, मेधा, वात्स्या और ह्लादिनी हैं जो हिम का सर्जन करने वाली हैं ॥२६॥ वे सब नाम से चन्द्रमा होती हैं और पीताभा किरणे हैं। शुक्ला, ककुभा, गाव, तथा विश्वभृता ये नाम से शुक्ला हैं और सब तीन सौ हैं तथा धर्म का सर्जन करने वाली होती हैं। उनसे सोम मनुष्य, देवता और पितृगण का भरण किया करता है ॥२७॥२८॥ यहाँ मनुष्यों को औषध के द्वारा, पितृगण को स्वधा के द्वारा और समस्त सुरों को अमृत के द्वारा इस तरह तीनों से इन सबको यह सतृप्त किया करता है ॥२९॥

वसंते चैव ग्रीष्मे च शतै. स तपते त्रिभिः।
वर्षास्वथो शरदि च चतुर्भिः सप्रवर्षति ॥३०॥
हेमन्ते शिशिरे चैव हिममुत्सृजते त्रिभिः ।
इन्द्रो धाता भग पूषा मित्रोथ वरुणोर्यमा ॥३१॥
अशुर्विवस्वास्त्वष्टा च पर्जन्यो विष्णुरेव च ।
वरुणो माघमासे तु सूर्य एव तु फाल्गुने ॥३२॥
चैत्रे मासि भवेदंशुर्धाता वैशाखतापन. ।
ज्येष्ठे मासि भवेदिन्द्र आषाढे चार्यमा रविः ॥३३॥
विवस्वान् श्रावणे मासि प्रोष्ठपादे भगः स्मृतः।
पर्जन्याश्वयुजे मासि त्वष्टा वै कार्तिके रविः ॥३४॥

पर्जन्य और विष्णु ये माघादि मासों के क्रम से बारह आदित्य और उनकी रश्मियाँ हैं। माघ मास मे वरुण तथा फाल्गुन में सूर्य होता है ॥३०॥३१॥३२॥ चैत्र मास मे अंशु और वैशाख मास में तप न करने वाले का नाम धाता है। ज्येष्ठ में इन्द्र तथा आषाढ मे अर्यमा नाम का रवि होता है ॥३३॥ श्रावण के महिने में विवस्वान् तथा भाद्रपद में भग नामधारी सूर्य कहा गया है। आश्विन मे पर्जन्य और कार्तिक में त्वष्टा नाम वाला रवि हुआ करता है ॥३४॥

मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः।
पञ्चरश्मिसहस्राणि वरुणस्यार्ककर्मणि ॥३५॥
षड्भिः सहस्रैः पूषा तु देवोंशुः सप्तभिस्तथा।
धाताष्टभिः सहस्रैस्तु नवभिस्तु शतक्रतुः ॥३६॥
विवस्वान् दशभिर्याति यात्येकादशभिर्भगः।
सप्तमस्तपिते मित्रस्त्वष्टा चौवाष्टभिः स्मृतः ॥३७॥
अर्यमा दशभिर्याति पर्जन्यो नवभिस्तथा।
षड्भी रश्मिसहस्रैस्तु विष्णुस्तपति मेदिनीम् ॥३८॥
वसते कपिलः सूर्यो ग्रीष्मे काचनसप्रभः।
श्वेतो वर्षासु वर्णेन पांडुः शरदि भास्करः ॥३९॥
हेमंते ताम्रवर्णस्तु शिशिरे लोहितो रविः।
इति वर्णाः समाख्याता मया सूर्यसमुद्भवाः ॥४०॥
ओषधीषु बलं धत्ते स्वधया च पितृष्वपि।
सूर्योऽमरेष्वप्यमृतं त्रय त्रिषु नियच्छति ॥४१॥
एवं रश्मिसहस्रं तत्सौरं लोकार्थसाधकम्।
भिद्यते लोकमासाद्य जलशीतोष्णनिस्स्रवम् ॥४२॥

मार्गशीर्ष में मित्र नाम वाला तथा पौष मे सनातन विष्णु नामधारी सूर्य होता है। सूर्य के कर्म में वरुण की पाँच सहस्र रश्मियाँ हुआ करती हैं ॥३५॥ ऋतुओं के भेद से वर्ण तथा मासों के भेद से सूर्य की रश्मियों की संख्या को बताते हुए कहते हैं कि पूषा नामक रवि छै

सहस्र रश्मियों से कार्य करता है। अंशु सात सहस्र से, धाता आठ हजार से और शत क्रतु नौ सहस्र रश्मियों से सूर्य का कर्म सम्पादन किया करता है ॥३५॥३६॥ विवस्वान् दश हजार रश्मियों से जाता है और भग ग्यारह हजार से जाता है। मित्र सात हजार रश्मियों से तपता है और त्वष्टा आठ सहस्र से कहा गया है ॥३७॥ अर्यमा दश तथा पर्जन्य नौ से और विष्णु छै सहस्र रश्मियों से इस मेदिनी को तपता है ॥३८॥ वसन्त ऋतु में सूर्य का कपिल वर्ण होता है और ग्रीष्म में काञ्चन की प्रभा से युक्त होता है। वर्षा ऋतु में सूर्य श्वेत वर्ण वाला होता है तथा शरद् ऋतु भास्कर पाण्डु वर्ण वाला हुआ करता है। ॥३९॥ हेमन्त ऋतु मे ताम्र के समान वर्ण वाला और शिशिर ऋतु मे रवि लोहित वर्ण का हुआ करता है। इस प्रकार से मैंने ये सूर्य में होने वाले वर्णों का वर्णन कर दिया है ॥४०॥ यह सूर्य औषधियों मे बल धारण कराता है और पितरो मे स्वधा के द्वारा तथा अमरगण मे अमृत ये तीन वस्तुएँ तीनो मे प्रदान करता है ॥४१॥ इस रीति से सूर्य की यह सहस्र रश्मियाँ लोक के अर्थ की साधक होती हैं। लोक को प्राप्त होकर जल-शीत और उष्णता का निस्रवण करने वाली भिन्न होती हैं ॥४२॥

इत्येतन्मण्डल शुक्ल भास्वरं सूर्यसज्ञितम् ।
नक्षत्रग्रहसोमाना प्रतिष्ठायोनिरेव च ॥४३॥
चद्रऋक्षग्रहाः सर्वे विज्ञेयाः सूर्यसभवाः ।
नक्षत्राधिपतिः सोमो नयन वाममीशितु ॥४४॥
नयन चैव मीशस्य दक्षिण भास्करः स्वयम् ।
तेषा जनाना लोकेस्मिन्नयन नयते यतः ॥४५॥

यह शुक्ल वर्ण वाला और देदीप्यमान सूर्य की सज्ञा वाला मण्डल है। यह नक्षत्र, ग्रह और सोम की प्रतिष्ठा का कारण स्वरूप होता है ॥४३॥ चन्द्र, नक्षत्र और समस्त ग्रह ये सब सूर्य से ही उत्पन्न

होने वाले जानने चाहिए। नक्षत्रों का अधिपति सोम होता है जो कि शिव का वाम नेत्र है ॥४४॥ ईश का दक्षिण नेत्र भास्कर ही स्वयं होता है। शिव का नेत्र होने से देव, पितृ और मनुष्यों के नयन को प्राप्त कराता है ॥४५॥

ग्रह प्रकृति वर्णन

शेषाः पंच ग्रहा ज्ञेया ईश्वराः कामचारिणः।
पठ्यते चाग्निरादित्य उदकं चन्द्रमाः स्मृतः ॥१॥
शेषाणां प्रकृतिं सम्यग्वक्ष्यमाणां निबोधत।
सुरसेनापतिः स्कंदः पठ्यतेऽङ्गारको ग्रहः ॥२॥
नारायणं बुधं प्राहुर्देवं ज्ञानविदो जनाः।
सर्वलोकप्रभुः साक्षाद्यमो लोकप्रभुः स्वयम् ॥३॥
महाग्रहो द्विजश्रेष्ठा मंदगामी शनैश्चरः।
देवासुरगुरू द्वौ तु भानुमंतौ महाग्रहौ ॥४॥
प्रजापतिसुतावुक्तौ ततः शुक्रबृहस्पती।
आदित्यमूलमखिलं त्रैलोक्यं नात्र संशयः ॥५॥
भवत्यस्माज्जगत्कृत्स्नं सदेवासुरमानुषम्।
रुद्रेन्द्रोपेन्द्रचन्द्राणां विप्रेन्द्राग्निदिवौकसाम् ॥६॥
द्युतिर्द्युतिमता कृत्स्नं यत्तेजः सार्वलौकिकम्।
सर्वात्मा सर्वलोकेशो महादेवः प्रजापतिः ॥७॥

इस अध्याय मे ग्रहों की प्रकृतियों का स्फुटतया वर्णन किया जाता है तथा सूर्य की रश्मियाँ साथ मुख्य हैं उस की महिमा का निरूपण दिया गया है। सूतजी ने कहा—सूर्य और चन्द्र के अतिरिक्त शेष भौमादिक पाँच ग्रह ईश्वर और काम चारी जानने के योग्य होते

हैं। आदित्य अग्नि कहा जाया करता है और चन्द्रमा उदक कहा गया है ॥१॥ शेष ग्रहों की प्रकृति मैं भली भाँति बतलाता हूँ उसे आप लोग समझ लेवें। देवताओं का सेनापति स्कन्द अङ्गारक अर्थात् भौम ग्रह कहा जाता है ॥२॥ ज्ञान के वेत्ता विद्वज्जन नारायण देव को बुध बताते हैं। समस्त लोकों का स्वामी तथा स्वयं लोक प्रभु साक्षात् यमराज हरि मन्द गमन करने वाला महान् ग्रह, हे द्विजो मे श्रेष्ठो ! यह शनैश्चर होता है। देवगण के और असुरों के गुरु दो भानुमान् महान् ग्रह हैं। इनके पश्चात् इन दोनों शुक्र तथा बृहस्पति को प्रजापति के पुत्र कहा गया है। यह सम्पूर्ण त्रैलोक्य आदित्य के ही मूल वाला होता है इसमें कोई भी संशय नहीं है ॥३॥४॥५॥ इसी से यह सम्पूर्ण देव, असुर तथा मनुष्यों के सहित जगत् होता है। रुद्र, इन्द्र, उपेन्द्र, चन्द्र, विप्रेन्द्र, अग्नि और देवगण जो द्युति वाले हैं इनकी द्युति और सम्पूर्ण सार्वलौकिक तेज है उस सबकी आत्मा एव सम्पूर्ण लोकों के स्वामी महादेव प्रजापति हैं ॥६॥७॥

सूर्य एव त्रिलोकेशो मूल परमदैवतम्।
तत सजायते सर्वं तत्रैव प्रविलीयते ॥८॥
भावाभावौ हि लोकानामादित्यान्निस्सृतौ पुरा।
अविज्ञेयो ग्रहो विप्रा दीप्तिमान्सुप्रभो रवि ॥९॥
अत्र गच्छन्ति निधन जायते च पुन पुन।
क्षणा मुहूर्ता दिवसा निशा पक्षाश्च कृत्स्नश ॥१०॥
मासा सवत्सराश्चैव ऋतवोऽथ युगानि च।
तदादित्या दृते ह्येषा कालसख्या न विद्यते ॥११॥
कालादृते न नियमो न दीक्षा नाह्निकक्रम।
ऋतूनां च विभागश्च पुष्प मूल फल कुत ॥१२॥
कुत सस्यविनिष्पत्तिस्तृणौषधिगणोऽपि च।
अभावो व्यवहाराणा जन्तूना दिवि चेह च ॥१३॥

जगत्प्रतापनमृते   भास्करं   रुद्ररूपिणम् ।
स एष कालश्चाग्निश्च द्वादशात्मा प्रजापतिः ॥१४॥

यह सूर्य ही तीनों लोकों का स्वामी, मूल और परम दैवत है । इसकी सभी कुछ की उत्पत्ति होती है और सब उसी मे प्रविलीन हो जाया करते हैं ॥८॥ लोकों के भाव और अभाव पहिले आदित्य से ही निकले थे । हे विप्रगण ! यह सुन्दर प्रभा से युक्त दीप्ति वाला रवि अविज्ञेय अर्थात् विशेष रूप से न जानने के योग्य ग्रह है ॥६॥ इसी मे क्षण, मूहूर्त, दिवस, निशा, पक्ष तथा सम्पूर्ण मास, सम्वत्सर, ऋतु और युग उत्पन्न होते हैं और इसी मे बार-बार उत्पन्न होकर निधन को प्राप्त हुआ करते हैं । इसलिये आदित्य को छोडकर अन्य किसी भी प्रकार से काल की सख्या ही नही होती है ॥१०॥११॥ काल के बिना तो कोई नियम ही नही हो सकता है और न कोई दीक्षा तथा दैनिक क्रम ही बनता है । ऋतुओ का विभाग, पुष्प, फल और मूल इसके बिना कैसे होगे ॥१२॥ काल के बताने वाले सूर्य देव के बिना सस्यो की निष्पत्ति, तृण और ओषधियो का समुदय भी कैसे होगा । दिवि लोक मे और यहाँ जन्तुओ के समस्त व्यवहारो का ही एकदम अभाव हो जायगा ॥१३॥ जगत् के प्रतापन रुद्र रूप वाले भगवान् भास्कर के बिना किसी की भी निष्पत्ति का होना सम्भव नही होता है । वह यह ही काल, अग्नि और द्वादश स्वरूप वाला प्रजापति है ॥१४॥

तपत्येष   द्विजश्रेष्ठास्त्रैलोक्यं   सचराचरम् ।
स एष तेजसा राशिः समस्तः सार्वलौकिकः ॥१५॥

उत्तमं मार्गमास्थाय राज्यहोभिरिदं जगत् ।
पार्श्वतोर्ध्वमधश्चैव तापयत्येष   सर्वशः ॥१६॥

यथा प्रभाकरो दीपो गृहमध्येऽवलम्बितः ।
पार्श्वतोर्ध्वमधश्चैव तमो नाशयते समम् ॥१७॥

तद्वत्सहस्रकिरणो ग्रहराजो जगत्प्रभुः ।
सूर्यो गोभिर्जगत्सर्वं मादीपयति सर्वतः ॥१८॥
रवे रश्मिसहस्रं यत्प्राङ् मया समुदाहृतम् ।
तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः ॥१६॥
सुषुम्नो हरि केशश्च विश्वकर्मा तथैव च ।
विश्वव्यचाः पुनश्चाद्यः सन्नद्धश्च ततः परः ॥२०॥
सर्वावसुः पुनश्चान्यः स्वराडन्यः प्रकीर्तितः ।
सुषुम्नः सूर्य रश्मिस्तु दक्षिणां राशिमैधयत् ॥२१॥

हे द्विज श्रेष्ठ गण ! इस चर एवं अचर से संयुत त्रैलोक्य में तपता है। यह यह ही तेजो का समूह है जो सम्पूर्ण स्वरूप वाला एवं सार्वलौकिक है ॥१५॥ उत्तम मार्ग मे आस्थित होकर यह इस जगत् को रात्रि तथा दिनों के द्वारा पार्श्वभाग मे, ऊर्ध्व भाग मे और अधो भाग मे सब ओर से तपाता है ॥१६॥ जिस तरह प्रभा के करने वाला दीप घर के मध्य मे आधारित होता हुआ पार्श्व भाग मे, ऊपर और नीचे समान रूप से अन्धकार का नाश किया करता है ॥१७॥ ठीक उसी की भाँति सहस्र किरणो वाला, ग्रहों का राजा तथा जगत् का प्रभु सूर्य भी अपनी किरणो के द्वारा सम्पूर्ण जगत् को सभी ओर से आदीपित कर दिया करता है ॥१८॥ रवि की एक सहस्र रश्मियाँ मैंने पहिले बतलाई है उन सबमे सात रश्मियाँ ग्रहो की योनियाँ होती हैं। ॥१६॥ सुषुम्न, हरि केश तथा विश्व कर्मा, विश्वव्यचा, फिर आद्य सन्नद्ध और इसके पश्चात् अन्य सर्वावसु और फिर अन्य स्वराट् बताया गई है। सुषुम्न सूर्य रश्मि ने दक्षिण राशि की अर्थात् चन्द्रमा की वृद्धि की थी ॥२०॥२१॥

न्यगूर्ध्वाधः प्रचारोऽस्य सुषुम्नः परिकीर्तितः ।
हरिकेशः पुरस्ताद्यो ऋक्षयोनिः प्रकीर्त्यते ॥२२॥
दक्षिणे विश्वकर्मा च रश्मिर्वर्धयते बुधम् ।
विश्वव्यचास्तु यः पश्चाच्छुक्रयोनिः स्मृतो बुधैः ॥२३॥

सन्नद्धश्च तु यो रश्मि: स योनि र्लोहितस्य तु ।
षष्ठ सर्वावसू रश्मि. स योनिस्तु बृहस्पते ॥२४॥
शनैश्चर पुनश्चापि रश्मिराप्यायते स्वराट् ।
एव सूर्यप्रभावेन नक्षत्रग्रह तारका ॥२५॥
दृश्यन्ते दिवि ता सर्वा विश्व चेद पुनजगत् ।
न क्षीयते यतस्तानि तस्मान्नक्षत्रता स्मृता ॥२६॥

इसका ऊपर और नीचे सभी ओर प्रचार है इसे सुषुम्न कहा गया है । पहिले जो हरिकेश है वह ऋक्षो की योनि अर्थात् नक्षत्रा का प्रकाशक कहा जाती है ॥२२ । दक्षिण म विश्वकर्मा नाम वाली रश्मि बुध का वर्धन किया करती है । जो विश्व व्यचा जो रश्मि है वह पीछे बुधो के द्वारा शुक्र की योनि कही गई है । छटी सर्वावसु नाम वाली रश्मि है वह बृहस्पति की योनि है । जो सन्नद्ध नामक रश्मि है वह लोहित की योनि होती है ॥२३॥२४॥ पुन स्वराट् नामक रश्मि शनश्चर को आप्यायित किया करती है । इस प्रकार से सूर्य के प्रभाव से अर्थात् तज से समस्त नक्षत्र, ग्रह और तारक अतरिक्ष मे दिखलाई दिया करते है और यह विश्व तथा जगत् दिखाई देता है । जो क्षीण नही हुआ करते हैं इसीलिये उन सब को नक्षत्र कहा गया है ॥२५॥२६॥

गृह सख्या वर्णन

क्षेत्राण्येतानि सर्वाणि आतपति गभस्तिभि ।
तपा क्षेत्राण्ययादत्तो सूर्यो नक्षत्र तारका ॥१॥
चीर्णेन सुकृतेनेह सुकृताते ग्रहाश्रया ।
तारणात्तारका ह्येता शुक्लत्वाच्चैव तारका ॥२॥
दिव्याना पार्थिवाना च नैशाना चैव सर्वश ।
आदानान्नित्यमादित्यस्तेजसा तमसामपि ॥३॥

सवने स्यंदनेऽर्थे च धातुरप विभाष्यते ।
सवनात्तेजसोऽपां च तेनासौ सविता मतः ॥४॥
वहुलश्चंद्र इत्येष ह्लादने धातुरुच्यते ।
शुक्लत्वे चामृतत्वे च शीतत्वे च विभाव्यते ॥५॥
सूर्याचन्द्रमसोर्दिव्ये मण्डले भास्वरे खगे ।
जलतेजोमये शुक्ले वृत्तकुंभनिभे शुभे ॥६॥
घनतोयात्मक तत्र मण्डलं शशिनः स्मृतम् ।
घनतेजोमयं शुक्लं मंडलं भास्करस्य तु ॥७॥

इस अध्याय मे ग्रहों के स्थानाभिमानी बताये गये हैं और स्थानो के रश्मि रूप ग्रह ऋक्ष आदि का निरूपण है । सूत जी ने कहा—ये रात्रि मे दृश्यमान क्षेत्र अर्थात् स्थान सूर्य की किरणो से प्रकाशित होते है । भारत मे आचरित सुकृत से उन पुण्य करने वालो के स्थान होते है । सुकृत के अन्त मे ग्रह वर्त्ती नक्षत्र तारकों को सूर्य ग्रहण कर लेता है । तारण से ये तारक होते है और शुक्ल होने से भी तारक कहे जाते है ॥१॥२॥ अब आदित्य शब्द की व्युत्पत्ति बताते है, दिव्य, पार्थिव और निशा मे होने वाले सब ओर के तेजोतमो के आदान करने से आदित्य यह नाम हुआ है ॥३॥ सवन और स्यन्दन अर्थ मे यह धातु पढी जाती है इसलिये तेज और जलो के सवन करने से इसका सविता यह नाम माना गया है ॥४॥ चन्द्र शब्द जिस धातु से निष्पन्न होता है उसका मूल रूप चदि धातु है यह ह्लादन के अर्थ मे है और बहुत से अर्थों का प्रतिपादक कहा जाता है । अतएव चन्द्र, यह शब्द ह्लादन के अतिरिक्त शुक्रत्व, अमृतत्व और शीतत्व को भी प्रकट करता है ॥५॥ सूर्य और चन्द्रमा के दिव्य, आकाशगामी भास्वर मण्डल जल और तेज से परिपूर्ण, शुक्ल, शुभ और वृत्त कुम्भ के तुल्य हैं ॥६॥ वहाँ पर शशी का मण्डल घने जल के स्वरूप वाला है, ऐसा बताया गया है और भास्कर का मण्डल घन तेज से परिपूर्ण एवं शुक्ल होता है ॥७॥

वसंति सर्वदेवाश्च स्थानान्येतानि सर्वशः ।
मन्वन्तरेषु सर्वेषु ऋक्षसूर्यग्रहाश्रयाः ॥८॥
तेन ग्रहागृहाण्येव तदाख्यास्ते भवन्ति च ।
सौरं सूर्योऽविशत्स्थानं सौम्यं सोमस्तथैव च ॥६॥
शौक्रं शुक्रोऽविशत्स्थानं षोडशार्चिः प्रतापवान् ।
बृहद्बृहस्पतिश्चैव लोहितश्चैव लोहितम् ॥१०॥
शनैश्चरं तथा स्थानं देवश्चापि शनैश्चरः ।
बौधं बुधस्तु स्वर्भानुः स्वर्भानुस्थानमाश्रित. ॥११॥
नक्षत्राणि च सर्वाणि नक्षत्राणि विशंति च ।
गृहाण्येतानि सर्वाणि ज्योतींषि सुकृतात्मनाम् ॥१२॥
कल्पादौ संप्रवृत्तानि निर्मितानि स्वयंभुवा ।
स्थानान्येतानि तिष्ठंति याव दाभूतसंप्लवम् ॥१३॥
मन्वन्तरेषु सर्वेषु देवस्थानानि तानि वै ।
अभिमानिनोऽवतिष्ठते देवाः स्थानं पुनः पुनः ॥१४॥

समस्त मन्वन्तरो मे नक्षत्र, सूर्य और ग्रह आश्रय होते हैं और इन स्थानो मे सभी ओर समस्त देवगण निवास किया करते हैं ॥८॥ इसी से गृहो को ही ग्रह कहते हैं और इसीलिये ये ग्रह,इस नाम वाले हुए है । सूर्य सौर मे प्रवेश कर गया तथा उसी प्रकार से सोम सौम्य मे प्रविष्ट हो गया था ॥६॥ षोडश अर्चियो वाला प्रतापी शुक्र शौक्र स्थान में प्रविष्ट हो गया था । बृहस्पति और लोहित लोहित स्थान मे प्रवेश कर गये थे ॥१०॥ शनैश्चर जो स्थान है उसमे देव शनैश्चर ने प्रवेश किया । बौध नामक स्थान मे बुध ने तथा स्वर्भानु के स्थान मे स्वर्भानु ने प्रवेश किया था ॥११॥ समस्त नक्षत्र अपने-अपने नक्षत्रो के स्थानो मे प्रवेश किया करते हैं । ये समस्त ज्योतियाँ जो है वे सब सुकृतात्माओ के घर ही होते हैं ॥१२॥ ये सब कल्प के आदि मे प्रवृत्त हुए हैं और स्वयम्भू के द्वारा निर्मित किये गये हैं । इन स्थानो मे सुकृती गण जब तक

सम्पूर्ण भूतो का संप्लव प्रलय होता है नब तक निवास करते हुए अव-स्थित रहा करते हैं ।।१३।। समस्त मन्वन्तरों मे वे देवो के स्थान हुआ करते हैं और स्थानभिमानी देवगण बार-बार उस स्थान मे आकर अवस्थित हुआ करते हैं ।।१४।।

अतीतैस्तु सहैतानि भाव्याभाव्यः सुरैः सह ।
वर्त्तंते वतमानैश्च स्थानिभिस्तैः सुरैः सह ।।१५।।
अस्मिन्मन्वंतरे चैव ग्रहा वैमानिकाः स्मृताः ।
विवस्वानदितेः पुनः सूर्यो वैवस्वतेंतरे ।।१६।।
द्यु तिमानृपिपुत्रस्तु सोमो देवो वसुः स्मृतः ।
शुक्रो देवस्तु विज्ञ`यो भार्गवोऽसुरयाजकः ।।१७।।
बृहत्तेजाः स्मृतो देवो देवाचार्योऽङ्गिरासुतः ।
बुधो मनोहरश्चैव ऋपिपुत्रस्तु स स्मृतः ।।१८।।
शनैश्चरो विरूपस्तु संज्ञापुत्रो विवस्वतः ।
अग्निर्विकेश्यां जज्ञे तु युवाऽसौ लोहितार्चिपः ।।१९।।
नक्षत्रऋक्षनामिभ्यो दाक्षायण्यस्तु ताः स्मृताः ।
स्वर्भानुः सिंहिकापुत्रो भूतसं तापनोऽसुरः ।।२०।।
सोमर्क्षग्रहसूर्येपु कीर्तितास्त्वभिमानिनः ।
स्थानान्येतान्तथोक्तानि स्थानिन्यश्चैव देवताः ।।२१।।

भाव्य और अभाव्य अतीत सुरो के साथ और वर्तमान स्थानों वाले उन सुरों के साथ मे रहा करते हैं ।।१५।। इस वर्तमान मन्वन्तर अर्थात् वैवस्वत मन्वन्तर मे विमानो मे विचरण करने वाले ग्रह कहे गये हैं। वैवस्वत मन्वन्तर में देवमाता अदिति का पुत्र विवस्वान सूर्य है ।।१६।। ऋपि का पुत्र द्यु तिमान वसुदेव सोम कहा गया है । असुरों का याजक भार्गव देव शुक्र जानने के योग्य है ।।१७।। अङ्गिरा का पुत्र बृहत्तेजा देव देवो का आचार्य बृहस्पति बताया गया है । ऋपि का पुत्र मनोहर बुध कहा गया है ।।१८।। विकृत स्वरूप वाला विवस्वान् का

छाया का पुत्र शनैश्चर है। लोहित अर्चियों वाला रुद्र के सकाश से विकेशी में अग्नि उत्पन्न हुआ था और वह युवा कुमार भौम है। भौम अग्नि स्वरूप है ॥१६॥ नक्षत्र और ऋक्ष नाम वाली वे दाक्षायणी कही गई हैं। स्वर्भानु सिंहिका का पुत्र है और यह भूतों को सन्ताप देने वाला असुर है चन्द्र, ऋक्ष, ग्रह और सूर्य में ये अभिमानी कहे गये हैं ये यथोक्त स्थान हैं और इनके स्थानी देवता होते हैं ॥२०॥२१॥

सौरमग्नि मयं स्थानं सहस्रांशोर्विवस्वतः ।
हिमांशोस्तु स्मृत स्थानमम्मयं शुक्लमेव च ॥२२॥
आप्यं श्यामं मनोज्ञं च बुधरश्मिगृह स्मृतम् ।
शुक्रस्याप्यम्मयं शुक्लं पदं षोडशरश्मिवत् ॥२३॥
नवरश्मि ते भौमस्य लोहित स्थानमुत्तमम् ।
हरिद्राभं बृहच्चापि षोडशार्चिर्वृहस्पतेः ॥२४॥
अष्टरश्मिगृहं चापि प्रोक्तं कृष्णं शनैश्चरे ।
स्वर्भानोस्तामसं स्थानं भूतसंतापनालयम् ॥२५॥
विज्ञेयास्तारकाः सर्वास्त्वृषयस्त्वेकरश्मयः ।
आश्रयाः पुण्यकीर्तीनां शुक्लाश्चापि स्ववर्णतः ॥२६॥
घनतोयात्मिका ज्ञेयाः कल्पादावेव निर्मिताः ।
आदित्य रश्मिसंयोगात्संप्रकाशात्मिकाः स्मृताः ॥२७॥
नवयोजनसाहस्रो विष्कंभः सवितुः स्मृतः ।
त्रिगुणस्तस्य विस्तारो मंडलस्य प्रमाणतः ॥२८॥

सहस्रांशु विवस्वान् का अग्निमय सौर स्थान है। और हिमांशु चन्द्र का जल से परिपूर्ण शुक्ल स्थान कहा गया है ॥२२॥ आप्य (जल मय), श्याम और सुन्दर बुध का रश्मि ग्रह बताया गया है। शुक्र का आप्य, शुक्ल और सोलह रश्मियों वाला स्थान होता है ॥२३॥ भौम का उत्तम स्थान नौ रश्मियों से युक्त लोहित वर्ण वाला है। हरिद्रा (हल्दी) के समान आभा वाला, वहुत बडा और षोडश अर्चियों वाला

देवाचार्य वृहस्पति का स्थान होता है ॥२४॥ आठ रश्मियों से संयुत और कृष्ण वर्ण वाला शनैश्चर का स्थान कहा गया है। भूतों को सन्तापन करने वाला स्थान जो एकदम अन्धकार से परिपूर्ण है ऐसा आलय स्वर्भानु का है ॥२५॥ सम्पूर्ण तारक एक रश्मि से युक्त, स्थान वाले ऋषिगण होते हैं। ये पुण्य कीर्ति वालों के आश्रय है जो वर्ण से शुक्ल है ॥२६॥ ये घन तोय के स्वरूप वाले जानने चाहिए जोकि कल्प के आदि में ही निर्मित किए हुये होते हैं। सूर्य की किरणों के संयोग से अच्छे प्रकाश के स्वरूप से युक्त बताये गये हैं ॥२७॥ सविता (सूर्य) का विष्कम्भ नौ सहस्र योजन वाला कहा गया है। मण्डल के प्रमाण से उसका विस्तार तिगुना होता है ॥२८॥

द्विगुणः सूर्यविस्ताराद्विस्तारः शशिनः स्मृतः ।
तुल्यस्तयोस्तु स्वर्भानुर्भूत्वाधस्तात्प्रसर्पति ॥२९॥
उद्धृत्य पृथिवीछायां निर्मिता मंडलाकृतिम् ।
स्वर्भानोस्तु वृहत्स्थानं तृतीय यत्तमोमयम् ॥३०॥
आदित्यात्तच्च निष्क्रम्य सम गच्छति पर्वसु ।
आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु ॥३१॥
स्वर्भानु नुदते यस्मात्तस्मात्स्वर्भानुरुच्यते ।
चन्द्रस्य षोडशो भागो भार्गवस्य विधीयते ॥३२॥
विष्कभान्मण्डलाच्चैव योजनाग्रात्प्रमाणतः ।
भार्गवात्पादहीनस्तु विज्ञेयो वै वृहस्पतिः ॥३३॥
वृहस्पतेः पादहीनौ वक्रसौरो उभौ स्मृतौ ।
विस्तारान्मण्डलाश्चैव पादहीनस्तयोर्बुधः ॥३४॥
तारानक्षत्ररूपाणि वपुष्मंतीह यानि वै ।
बुधेन तानि तुल्यानि विस्तारान्मण्डलाच्च वै ॥३५॥

सूर्य के विस्तार से चन्द्रमा का विस्तार दुगुना कहा गया है। उन दोनों के समान विस्तार वाला इनके नीचे होकर प्रसर्पण (गमन) किया करता है ॥२९॥ मण्डल के आकार वाली पृथिवी की निर्मित

छाया को उद्धृत करके स्वर्भानु या तमोमय तीसरा एक बहुत बड़ा स्थान होता है ॥३०॥ वह सूर्य से निकल कर पर्वों मे साथ जाया करता है। फिर सोम से सौर पर्वों मे आदित्य के समीप जाता है ॥३१॥ स्व-र्भानु को नुदित (प्रेरित) किया करता है इसी कारण से इसका नाम 'स्वर्भानु'—यह कहा जाता है। चन्द्रमा का सोलहवाँ भाग भार्गव (शुक्र) का होता है ॥३२॥ जो कि विष्कम्भ मण्डल और योजनाग्र के प्रमाण से हुआ करता है। एक चतुर्थांश भाग भार्गव से कम वृहस्पति को समझना चाहिये ॥३३॥ देवों के आचार्य वृहस्पति के प्रमाण से एक पाद अर्थात् चतुर्थ भाग कम वाले वक्र और सौरि इन दोनो को बताया गया है। विस्तार तथा मण्डल से इन दोनो से एक पाद कम बुध होता है ॥३४॥ तारा और नक्षत्र के स्वरूप वाले जो वपुष्मान् हैं वे सब मण्डल तथा विस्तार मे बुध के ही समान होते हैं ॥३५॥

प्रायशश्चन्द्रयोगिनी विद्यादृक्षाणि तत्त्ववित् ।
तारानक्षत्ररूपाणि हीनानि तु परस्परम् ॥३६॥
शतानि पञ्च चत्वारि त्रीणि द्वे चैव योजने ।
सर्वोपरि निकृष्टानि तारका मडलानि तु ॥३७॥
योजनान्यर्धमात्राणि तेभ्यो ह्रस्वं न विद्यते ।
उपरिष्टात्त्रयस्तेपा ग्रहास्ते दूरसर्पिणः ॥३८॥
सौरोङ्गिराश्च वक्रश्च ज्ञेया मदविचारिणः ।
पूर्वमेव समाख्याता गतिस्तेपा यथाक्रमम् ॥३९॥
एतेष्वेव ग्रहाः सर्वे नक्षत्रेपु समुत्थिताः ।
विवस्वानदितेः पुत्रः सूर्यो वै मुनिसत्तमाः ॥४०॥
विशाखासु समुत्पन्नो ग्रहाणां प्रथमो ग्रहः ।
त्विषिमान् धर्मपुत्रस्तु सोमो देवो वसुस्तु सः ॥४१॥
शीतरश्मिः समुत्पन्नः कृत्तिकासु निशाकरः ।
पोडशार्चिर्भृगोः पुत्रः शुक्र सूर्यादनंतरम् ॥४२॥

तत्त्व वेत्ताओं को प्रायः ऋक्षों को चन्द्र के योग वाले जानने चाहिये। तारा नक्षत्र रूप वाले परस्पर में हीन होते हैं ॥३६॥ दो, तीन, चार और पाँच सौ योजन सबके ऊपर निकृष्ट तारकों के मंडल हुआ करते हैं ॥३७॥ उनमें एक अर्ध योजन से कम ह्रस्व कोई भी नहीं होता है। उनके ऊपर ये दूर सर्पण करने वाले तीन गृह होते हैं ॥३८॥ सौर, वक्र और अङ्गिरा ये मन्द गमन करने वाले होते हैं। हमने इनकी गति क्रमानुसार पूर्व में ही बतलादी है ॥३९॥ सम्पूर्ण ग्रह इन ही नक्षत्रों में समुत्थित हुये हैं। हे मुनिश्रेष्ठो ! अदिति देवमाता का पुत्र विवस्वान् सूर्य है ॥४०॥ ग्रहों में यह प्रथम ग्रह विशाखाओं में समुत्पन्न हुआ है। त्विषिमान् धर्म का पुत्र सोमदेव वसु है ॥४१॥ शीतल रश्मियों (किरणों) वाला निशाकर (चन्द्र) कृत्तिकाओं में समुत्पन्न हुआ है। षोडश अर्चियों वाला भृगु ऋषि का आत्मज शुक्र सूर्य के अनन्तर समुत्पन्न हुआ है ॥४२॥

तारामहाणां प्रवरस्तिष्ये क्षेत्रे समुत्थितः ।
ग्रहश्चाङ्गिरसः पुत्रो द्वादशार्चिर्बृहस्पतिः ॥४३॥
फाल्गुनीषु समुत्पन्नः पूर्वाख्यासु जगद्गुरुः ।
नवार्चिर्लोहिताङ्गश्च प्रजापतिसुतो ग्रहः ॥४४॥
आषाढास्विह पूर्वासु समुत्पन्न इति स्मृतः ।
रेवतीष्वेव सप्तार्चिःस्थाने सौरिः शनैश्चरः ॥४५॥
सोम्यो बुधो धनिष्ठासु पञ्चार्चिरुदितो ग्रहः ।
तमोमयो मृत्युसुतः प्रजाक्षयकरः शिखी ॥४६॥
आश्लेषासु समुत्पन्नः सर्वहारि महाग्रहः ।
तथा स्वनामधेयेषु दाक्षायण्यः समुत्थिताः ॥४७॥
तमोवीर्यमयो राहुः प्रकृत्या कृष्णमडलः ।
भरणीषु समुत्पन्नो ग्रहश्चन्द्रार्कमर्दनः ॥४८॥
एते तारा ग्रहाश्चापि बोद्धव्या भार्गवादयः ।
जन्मनक्षत्रपीडासु यान्ति वैगुण्यतां यतः ॥४९॥

यह सम्पूर्ण तारा ग्रहों में श्रेष्ठतम शुक्रतिष्य क्षेत्र मे समुत्थित होने वाला बताया गया है। अङ्गिरा का पुत्र बृहस्पति नाम वाला जो ग्रह है वह बारह अर्चियो वाला है ॥४३॥ यह जगद्गुरु पूर्वा फाल्गुनी समुत्पन्न हुआ है। नौ अर्चियों से संयुक्त प्रजापति का पुत्र लोहित अङ्ग वाला ग्रह अर्थात् भौम जो है वह पूर्वा आषाढाओ मे उत्पन्न होने वाला कहा गया है। सूर्य का पुत्र शनैश्चर जो सात अर्चियो से युक्त होता हैं रेवतीयो मे समुत्पन्न हुआ है ॥४४॥४५॥ अनि सौम्य एव सोम का पुत्र बुध जो पाँच अर्चियो से संयुत है यह ग्रह घनिष्ठाओ मे उदित हुआ है। अन्धकार से परिपूर्ण, प्रजा के क्षय करने वाला, मृत्यु का पुत्र शिरनी आश्लेषाओ मे समुत्पन्न हुआ हैं। यह सबका हरण करने वाला महान् ग्रह है। अपने नामधेयो मे दाक्षायणीं समुत्पन्न हुई हैं ॥४६॥४७॥ राहु, तम और वीर्य से परिपूर्ण है तथा प्रकृति से कृष्ण मण्डल वाला है। यह चन्द्र और सूर्य का मदन करने वाला शत्रु ग्रह भरणियो मे समुत्पन्न हुआ है ॥४८॥ ये समस्त तारा और भार्गव आदि ग्रह अपने-अपने जन्म के नक्षत्रो मे उत्पन्न पीडाओ में अनिष्ट स्थान वर्त्ती हो जाया करते हैं ॥४६॥

मुच्यते तेन दोषेण ततस्तद्ग्रहभक्तिलः ।
सर्वग्रहाणामेतेषामादिरादित्य उच्यते ॥५०॥
ताराग्रहाणां शुक्रस्तु केतूनां चापि धूमवान् ।
ध्रुवः किल ग्रहाणां तु विभक्तानां चतुर्दिशम् ॥५१॥
नक्षत्राणां श्रविष्ठा स्यादयनानां तथोत्तरम् ।
वर्षाणां चैव पञ्चानामाद्यः संवत्सरः स्मृतः ॥५२॥
ऋतूनां शिशिरश्चापि मासानां माघ उच्यतेः ।
पक्षाणां शुक्लपक्षस्तु तिथीनां प्रतिपत्तथा ॥५३॥
अहोरात्रविभागानामहश्चादिः प्रकीर्तितः ।
मुहूर्त्तानां तथैवादिर्मुहूर्तो रुद्रदैवतः ॥५४॥

क्षणश्चापि निमेषादिः कालः कालविदां वराः ।
श्रवणान्तं धनिष्ठादि युगं स्यात्पञ्चवार्षिकम् ॥५५॥
भानोर्गतिविशेषेण चक्रवत्परिवर्तते ।
दिवाकरः स्मृतस्तस्मात्कालकृद्विभुरीश्वरः ॥५६॥

इस पूर्वोक्त कारण से प्रविष्ट स्थान में रहने वाले ग्रह के सेवन से उनसे उस ग्रह दोष से मुक्त हो जाया करता है । इन समस्त ग्रहों के आदि में होने वाला आदित्य कहा जाता है ॥५०॥ तारा ग्रहों में शुक्र और केतुओं में धूमवान् तथा विभक्त ग्रहों के चारों दिशाओं में ध्रुव होता है ॥५१॥ नक्षत्रों में धनिष्ठा आदि है और अयनों में उत्तरायण है । पांच वर्षों में सम्वत्सर आदि में होने वाला कहा गया है ॥५२॥ छै ऋतुओं में सबसे पहिले होने वाला शिशिर ऋतु है तथा मासों में माघ मास सबसे आदि वाला है । पक्षों में शुक्ल पक्ष तथा तिथियों में प्रतिपदा तिथि आदि है ॥५३॥ अहोरात्र के जो विभाग होते हैं उनमें अह आदि में होने वाला है । मुहूर्तों में रुद्र दैवत सबसे आदि में होने वाला मुहूर्त होता है ॥५४॥ क्षणों में हे काल विदों में परम श्रेष्ठो ! निमेष आदि काल है । धनिष्ठा से आदि लेकर श्रवण के अन्त पर्यन्त पांच वर्ष का युग होता है ॥५५॥ भानु की गति की विशेषता से दिवाकर चक्र की भांति परिवर्तित होता है । इसी कारण से यह काल की रचना करने वाला व्यापक और ईश्वर कहा गया है ॥५६॥

चतुर्विधानां भूतानां प्रवर्तकनिवर्तकः ।
तस्यापि भगवान् रुद्र साक्षाद्देवः प्रवर्तकः ॥५७॥
इत्येष ज्योतिषामेव सन्निवेशोर्थनिश्चयः ।
लोकसंव्यवहारार्थं महादेवेन निर्मितः ॥५८॥
बुद्धिपूर्वं भगवता कल्पादौ संप्रवर्तितः ।
स आश्रयोभिमानी च सर्वस्य ज्योतिरात्मकः ॥५९॥

एकरूपप्रधानस्य परिणामोयमद्भुतः ।
नैष शक्यः प्रसंख्यातुं याथातथ्येन केनचित् ॥६०॥
गतागतं मनुष्येण ज्योतिषां मांसचक्षुषा ।
आगमादनुमानाच्च प्रत्यक्षादुपपत्तितः ॥६१॥
परीक्ष्य निपुणं बुद्धया श्रद्धातव्यं विपश्चिता ।
चक्षुः शास्त्रं जलं लेख्यं गणितं मुनिसत्तमाः ॥६२॥
पञ्चैते हेतवो ज्ञेया ज्योतिर्मानविनिर्णये ॥६३॥

यह दिवाकर चारो प्रकार के भूतो के प्रवृत्त करने वाला तथा निवर्त्तक होता है किन्तु उस दिवाकर का भी प्रवर्तक साक्षात् देव भगवान रुद्र होते हैं ॥५७॥ इस प्रकार से यह ज्योतियों का अर्थ निश्चय वाला सन्निवेश लोक के भली-भाँति व्यवहार के लिये महादेव ने निर्मित किया है ॥५८॥ भगवान् ने बुद्धि पूर्वक यह कल्प के आदि मे ही भली-भाँति प्रवृत्त किया है। वह सबका ज्योति स्वरूप वाला अभिमानी आश्रय है ॥५९॥ एक रूप वाले प्रधान का यह परम अद्भुत परिणाम होता है। यह यथार्थ रूप से प्रसख्यान करना किसी के द्वारा भी नही हो सकता है ॥६०॥ मास की चक्षु वाले विद्वान् मनु को ग्रहादि का सम तथा वक्र गमन के विषय मे आगम आदि के द्वारा भली-भाँति परीक्षण करके तथा अनुमान और प्रत्यक्ष उपपत्ति से जानकर ही श्रद्धा करनी चाहिये। हे मुनिसत्तमो ! शास्त्र, जल, लेख्य और गणित तथा चक्षु हेतु हैं ॥६१॥६२॥ ज्योतियो के मान के निर्णय चक्षु आदि उपर्युक्त पाँच हेतु होते हैं ॥६३॥

ध्रुव आख्यान

कथं विष्णोः प्रसादाद्वै ध्रुवो बुद्धिमतां वरः ।
मेढीभूतो ग्रहाणां वै वक्तुमर्हसि सांप्रतम् ॥१॥
एतमर्थं मया पृष्टो नानाशास्त्रविशारदः ।
मार्कण्डेयः पुरा प्राह मह्यं शुश्रूषवे द्विजाः ॥२॥
सार्वभौमो महातेजाः सर्वशस्त्रभृतां वरः ।
उत्तानपादो राजा वै पालयामास मेदिनीम् ॥३॥
तस्य भार्याद्वयमभूत्सुनीतिः सुरुचिस्तथा ।
अग्रजायामभूत्पुत्रः सुनीत्यां तु महायशाः ॥४॥
ध्रुवो नाम महाप्राज्ञः कुलदीपो महामतिः ।
कदाचित्सप्तवर्षोपि पितुरङ्कमुपाविशत् ॥५॥
सुरुचिस्तं विनिर्धूय स्वपुत्र प्रीतिमानसा ।
न्यवेशयत्तं विप्रेन्द्रा ह्यङ्कं रूपेण मानिता ॥६॥
अलब्ध्वा स पितुर्धीमानङ्कं दुःखितमानसः ।
मातुः समीपमागम्य रुरोद स पुनः पुनः ॥७॥

इस अध्याय मे उस चरित का वर्णन किया जाता है जिसमें ध्रुव ने तपस्या के द्वारा केशव की आराधना करके परम पद की प्राप्ति की थी। ऋषियो ने कहा—बुद्धमानो मे परम श्रेष्ठ ध्रुव ने किस प्रकार से भगवान् की प्रसन्नता प्राप्त की थी और उस प्रसाद से वह कैसे ग्रहो के मध्य मे मेढीभूत अर्थात् मध्योपरिस्थ प्रधान हो गया था—अब इसे कृपा कर आप कहने के योग्य हैं ॥१॥ सूत जी ने कहा—मैंने पहिले इसी बात को अनेक शास्त्रो के महा पण्डित मार्कण्डेय से पूछा था। हे द्विजगण ! उन मार्कण्डेय महर्षि ने श्रवण की इच्छा रखने वाले मुझसे यह चरित्त कहा था ॥२॥ मार्कण्डेय ने कहा—सब प्रकार के शस्त्र धारण करने वालो मे अति श्रेष्ठ, महान् तेजस्वी चक्रवर्त्ती राजा उत्तानपाद इस पृथ्वी का पालन करता था ॥३॥ उस राजा के दो

